# shrImUkapa nchashatI

# શ્રીમૂકપઞ્ચશતી

## Document Information

Text title : shrImUkapanchashatI

File name : shrImUka500.itx

Category : shataka, devii, otherforms, devI, panchashatI

Location : doc_devii

Author : mUka mahAkavi

Transliterated by : Sridhar Seshagiri sridhar.seshagiri at gmail.com

Proofread by : Sridhar Seshagiri sridhar.seshagiri at gmail.com

Latest update : January 6, 2003, March 10, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીમૂકપઞ્ચશતી

માતા મરકતશ્યામા માતઙ્ગી મદશાલિની ।

કુર્યાત્ કટાક્ષં કલ્યાણી કદમ્બવનવાસિની ॥

॥ શ્રીઃ ॥

॥ શ્રીચન્દ્રમૌલીશ્વરાય નમઃ ॥

॥ શ્રીકારણપરચિદ્રૂપાયૈ નમઃ ॥

શ્રીમૂકમહાકવિપ્રણીતા

॥ શ્રીઃ ॥

॥ શ્રીમૂકપઞ્ચશતી ॥

શ્રીકામાક્ષીપરદેવતાયાઃ પાદારવિન્દયોઃ

## ભક્તિભરેણ સમર્પિતમ્ ॥

આર્યામેવ વિભાવયન્મનસિ યઃ પાદારવિન્દં પુરઃ

પશ્યન્નારભતે સ્તુતિં સ નિયતં લબ્ધ્વા કટાક્ષચ્છવિમ્ ।
કામાક્ષ્યા મૃદુલસ્મિતાંશુલહરીજ્યોત્સ્નાવયસ્યાન્વિતા-
મારોહત્યપવર્ગસૌધવલભીમાનન્દવીચીમયીમ્ ॥

[મન્દસ્મિત ૧૦૧ ]

શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યવર્ય શ્રીકામકોટિપીઠાધીશ્વર-
જગદ્ગુરુ શ્રીમત્ ચન્દ્રશેખરેન્દ્રસરસ્વતી શ્રીપાદાનાં
શ્રીમુખેન સમદ્ભાસિતા

---

## ॥ શ્રીઃ ॥

## ॥ શ્રીચન્દ્રમૌલીશ્વર ॥

### મુદ્રા

સ્વસ્તિ શ્રીમદખિલભૂમણ્ડલાલંકાર-ત્રયસ્ત્રિંશત્કોટિ-
દેવતાસેવિત શ્રીકામાક્ષીદેવીસનાથ-શ્રીમદેકામ્રનાથ-
શ્રીમહાદેવીસનાથ-શ્રીહસ્તિગિરિનાથ-સાક્ષાત્કારપરમ-
અધિષ્ઠાનસત્યવ્રતનામાઙ્કિત-કાઞ્ચીદિવ્યક્ષેત્રે શારદા-
મઠસુસ્થિતાનામ્, અતુલિતસુધારસમાધુર્યકમલાસનકામિની-
ધમ્મિલ્લ સમ્ફુલ્લમલ્લિકામાલિકાનિષ્યન્દમકરન્દઝરી-
સૌવસ્તિકવાઙ્નિગુમ્ભવિજૃમ્ભણાનન્દતુન્દિલિતમણીષિ-
મણ્ડલાનામ્, અનવરતાદ્વૈતવિદ્યાવિનોદરસિકાનામ્,
નિરન્તરાલંકૃતીકૃતશાન્તિદાન્તિભૂમ્નામ્, સકલભુવન-
ચક્રપ્રતિષ્ઠાપક શ્રીચક્રપ્રતિષ્ઠાવિખ્યાતયશોઽલંકૃતાનામ્,

નિખિલપાષણ્ડષણ્ડકણ્ટકોદ્ધાટનેન વિશદીકૃતવેદવેદાન્ત-
માર્ગષણ્મતપ્રતિષ્ઠાપકાચાર્યાણામ્, શ્રીમત્પરમહંસપરિવ્રાજક-
આચાર્યવર્ય-શ્રીજગદ્ગુરુ શ્રીમચ્છંકરભગવત્પાદાચાર્યાણામ્
અધિષ્ઠાને સિંહાસનાભિષિક્ત શ્રીમન્મહાદેવેન્દ્રસરસ્વતી-
સંયમીન્દ્રાણામ્, અન્તેવાસિવર્ય શ્રીમચ્ચન્દ્રશેખરેન્દ્રસરસ્વતી
શ્રીપાદૈઃ ।

ક્રિયતે નારાયણસ્મૃતિઃ

તત્રભવાન્ મૂક ઇતિ સુપ્રસિદ્ધઃ મહાકવિશિરોમણિઃ
શ્રીકામાક્ષીદેવીકરુણાકટાક્ષતરઙ્ગિતપુણ્યકવિતારસપૂરઃ
'મૂકપઞ્ચશતી' ઇતિ કર્તુર્નામ્ના પ્રસિદ્ધમિમં લોકોત્તરં
ગ્રન્થં પ્રણીય ભૂમણ્ડલેઽનુત્તમં પુણ્યયશોવિશેષં શાશ્વતીં
પરાનન્દાનુભૂતિં ચ લબ્ધવાનિતિ સુવિદિતમેવ । સ્તોત્રરત્ને
ચાસ્મિન્ કાઞ્ચીમધ્યગત કામકોટિપીઠાધિષ્ઠાત્રીમ્
ઇન્દુમૌલેરૈશ્વર્યરૂપાં શ્રીકામાક્ષીં પરદેવતામ્,
આરૂઢયૌવનાટોપા, તરુણિમસર્વસ્વં, નિત્યતરુણી,
લાવણ્યામૃતતરઙ્ગમાલા, વિભ્રમસમવાયસારસન્નાહા,
શૃઙ્ગારાદ્વૈતતન્ત્રસિદ્ધાન્તં, મીનધ્વજતન્ત્રપરમતાત્પર્યં
કન્દર્પસૂતિકાપાઙ્ગી, મનસિજસામ્રાજ્યગર્વબીજં,
પુષ્પાયુધવીર્યસરસપરિપાટી, મદનાગમસમયદીક્ષિત-
કટાક્ષા, કુસુમશરગર્વસમ્પત્કોશગૃહમ્, અનઙ્ગબ્રહ્મતત્ત્વ-
બોધસિરા, પઞ્ચશરશાસ્ત્રબોધનપરમાચાર્યદૃષ્ટિપાતા
ઇત્યાદિરૂપેણ વર્ણયન્ પુનઃ લાવણ્યમૃતપરકાષ્ઠાભૂતાં
તામેવ પરદેવતાં, કારણપરચિદ્રૂપા, કૈવલ્યાનન્દકન્દઃ,
આમ્નાયરહસ્યમ્, ઉપનિષદરવિન્દકુહરમધુધારા,
વાઙ્મનોઽતીતા, આનન્દાદ્વૈતકન્દલી, મુક્તિબીજમ્,
આગમસલ્લાપસારયાથાર્થ્યં, બોધામૃતવીચી, અભિદાકૃતિઃ,
ઐકાત્મ્યપ્રકૃતિઃ, નિગમવચસ્સિદ્ધાન્તઃ, ગુરુમૂર્તિઃ, ઇત્યેવં-
રૂપેણ સાક્ષાત્કુર્વન્ યૌવનશૃઙ્ગારાદિવિષયરસાનુભવ-
સામગ્રીં જ્ઞાનવૈરાગ્યાદિબ્રહ્માનન્દાનુભવસામગ્રીત્વેન
સમ્પાદયન્ -

"શિવ શિવ પશ્યન્તિ સમં શ્રીકામાક્ષીકટાક્ષિતાઃ પુરુષાઃ ।
વિપિનં ભવનમમિત્રં મિત્રં લોષ્ટં ચ યુવતિબિમ્બોષ્ઠમ્ ॥"
ઇતિ પરદેવતાનુગ્રહફલીભૂતાં પરવૈરાગ્યકાષ્ઠાં પ્રકટયતિ ।
[આર્યા ૪૮ ]

પદ્મપઞ્ચશતકાત્મકેઽત્ર ગ્રન્થે શતકાનાં યા આનુપૂર્વી તસ્યામયં વિશેષો દૃશ્યતે । યથા કશ્ચન શિશુઃ ચક્ષુરાદિ ઇન્દ્રિયપ્રાગલ્ભ્યાવિર્ભાવાત્પૂર્વં મનોવૃત્તિમાત્રેણ કલયતિ સ્વેપ્સિતમ્ ; એવમાર્યાશતકે ભક્તશિશોઃ મનઃ પ્રવૃત્તિમ્ અમ્બિકાયાઃ સ્વરૂપાનુસન્ધાનપટીયસીં સમ્પાદયતિ કવિપુઙ્ગવઃ ; અયમાશયઃ -
"અન્તરપિ બહિરપિ ત્વં જન્તુતતેરન્તકાન્તકૃદહન્તે ।
ચિન્તિતસન્તાનવતાં સન્તતમપિ તન્તનીષિ મહિમાનમ્ ॥"
ઇતિ શ્લોકેન સૂચિતઃ ॥ [આર્યા ૯૮ ]

દ્વિતીયશતકે તાવત્ યથા કિઞ્ચિત્પ્રવૃદ્ધગ્રહણશક્તિઃ બાલકઃ ખાન્તિકે વિદ્યમાનસ્ય વસ્તુનઃ દર્શન-સ્પર્શનાદિભિઃ આહ્લાદમધિગચ્છતિ તદ્વત્ ભક્તબાલકઃ અત્યન્તમધોભાગે વિદ્યમાનસ્ય સ્વસ્યાન્તિકત્વેનૈવ જગન્માતુઃ નિરન્તરધ્યાનફલીભૂત પાદારવિન્દ દર્શન-આનન્દમનુભવતીત્યયમાશયઃ -
"મરાલીનાં યાનાભ્યસનકલનામૂલગુરવે
દરિદ્રાણાં ત્રાણવ્યતિકરસુરોદ્યાનતરવે ।
તમસ્કાણ્ડપ્રૌઢિપ્રકટનતિરસ્કારપટવે
જનોઽયં કામાક્ષ્યાશ્ચરણનલિનાય સ્પૃહયતે ॥"
ઇતિ શ્લોકેન સૂચિતઃ ॥ [પાદારવિન્દ ૩ ]

યથા મનસઃ જ્ઞાનેન્દ્રિયાણાં ચ સ્ફૂર્ત્યનન્તરમેવ વાક્પ્રસરતિ, તથૈવ આર્યાપાદારવિન્દશતકયોરનન્તરં સ્વપ્રેમાસ્પદં વસ્તુ નિરર્ગલં સ્તોતુમારભતે -
"પાણ્ડિત્યં પરમેશ્વરિ સ્તુતિવિધૌ નૈવાશ્રયન્તે ગિરાં
વૈરિઞ્ચાન્યપિ ગુમ્ફનાનિ વિગલદ્ગર્વાણિ શર્વાણિ તે ।
સ્તોતું ત્વાં પરિફુલ્લનીલનલિનશ્યામાક્ષિ કામાક્ષિ માં

"વાચાલીકુરુતે તથાપિ નિતરાં ત્વત્પાદસેવાદરઃ ॥"
ઇતાદિના સ્તુતિશતકેન । [સ્તુતિ ૧ ]

લૌકિકાવિદ્યાદિષુ કુશલઃ કશ્ચન યથા લૌકિકસમ્પદઃ
પ્રાપ્તુર્મહો ભવતિ તદ્વત્ પૂર્વકૃતસ્તુતિફલત્વેન ભક્તઃ
અમ્બિકાયાઃ કટાક્ષવિશેષમધિગમ્ય પરસંવિદનુભૂત્ય-
ઉચિતતેજઃપુષ્ટ્યાદિપાત્રં ભવતીત્યયમાશયઃ-
"અસ્તં ક્ષણાન્નયતુ મે પરિતાપસૂર્ય-
માનન્દચન્દ્રમસમાનયતાં પ્રકાશમ્ ।
કાલાન્ધકારસુષમાં કલયન્ દિગન્તે
કામાક્ષિ કોમલકટાક્ષનિશાગમસ્તે ॥"
ઇત્યાદિભિર્વર્ણનૈઃ કટાક્ષશતકે સૂચિતઃ ॥ [કટાક્ષ ૬ ]

યથા લૌકિકસમ્પત્સમ્પૂર્ણઃ કશ્ચન સમગ્રયૌવનઃ
લૌકિકશૃઙ્ગારસુખાનુભવાય પાત્રં ભવતિ, તદ્વત્
દેવ્યાઃ પરમાનુગ્રહપાત્રીભૂતઃ તદીયમન્દસ્મિત-
ચન્દ્રિકાસનાથઃ આનન્દચન્દ્ર ઇવ અલૌકિક-
નિરતિશયાનન્દાનુભવાત્મકઃ પ્રકાશત ઇતિ
અમૂમેવ ભાવપ્રણાલિકાં મહાકવિઃ સ્વયમેવ
પઞ્ચશતીપુર્તિમ્પદ્યેન આવિષ્યકરોતિ । યથા -
"આર્યામેવ વિભાવયન્મનસિ યઃ પાદારવિન્દં પુરઃ
પશ્યન્નારભતે સ્તુતિં સ નિયતં લબ્ધ્વા કટાક્ષચ્છવિમ્ ।
કામાક્ષ્યા મૃદુલસ્મિતાંશુલહરીજ્યોત્સ્નાવયસ્યાન્વિતા-
મારોહત્યપવર્ગસૌધવલભીમાનન્દવીચીમયીમ્ ॥"
ઇતિ । [મન્દસ્મિત ૧૦૧ ]

અસ્યા લોકોત્તરાયાઃ સ્તુતેઃ પઠનમાત્રેણ તત્ક્ષણે
મહાકવિનાઽમુના અન્તતઃ પરદેવતયૈવ વા
ઐકાત્મ્યમનુભવતીવ સાધકઃ ।
તદિદં ગ્રન્થરત્નં દ્રાવિડભાષામયાર્થાનુવાદ-
સહિતમચિરાદેવ મહતા પરિશ્રમેણ ભક્તિભરેણ
મુદ્રાપ્ય શ્રી કામાક્ષી દેવી કુમ્ભાભિષેક શુભ-
મુહૂર્ત એવ ઉપહારીકૃતવતે, મુદ્રાપણદિવિષયે પરમં

સાહાય્યમાચરિતવદ્ભ્યઃ, તદ્ગ્રન્થપઠિતૃભ્યશ્ચ
ભક્તપુઙ્ગવેભ્યઃ શ્રીકામાક્ષીકટાક્ષાઃ સમુલ્લ-
સન્ત્વિત્યાશાસ્મહે ॥

॥ ઇતિ નારાયણસ્મૃતિઃ ॥

## ॥ આર્યાશતકમ્ ॥

કારણપરચિદ્રૂપા કાઞ્ચીપુરસીમ્નિ કામપીઠગતા ।
કાચન વિહરતિ કરુણા કાશ્મીરસ્તબકકોમલાઙ્ગલતા ॥ ૧॥

કંચન કાઞ્ચીનિલયં કરધૃતકોદણ્ડબાણસૃણિપાશમ્ ।
કઠિનસ્તનભરનમ્રં કૈવલ્યાનન્દકન્દમવલમ્બે ॥ ૨॥

ચિન્તિતફલપરિપોષણચિન્તામણિરેવ કાઞ્ચિનિલયા મે ।
ચિરતરસુચરિતસુલભા ચિત્તં શિશિરયતુ ચિત્સુખાધારા ॥ ૩॥

કુટિલકચં કઠિનકુચં કુન્દસ્મિતકાન્તિ કુઙ્કુમચ્છાયમ્ ।
કુરુતે વિહૃતિં કાઞ્ચ્યાં કુલપર્વતસાર્વભૌમસર્વસ્વમ્ ॥ ૪॥

પઞ્ચશરશાસ્ત્રબોધનપરમાચાર્યેણ દૃષ્ટિપાતેન ।
કાઞ્ચીસીમ્નિ કુમારી કાચન મોહયતિ કામજેતારમ્ ॥ ૫॥

પરયા કાઞ્ચીપુરયા પર્વતપર્યાયપીનકુચભરયા ।
પરતન્ત્રા વયમનયા પઙ્કજસબ્રહ્મચારિલોચનયા ॥ ૬॥

ઐશ્વર્યમિન્દુમૌલેરૈકાત્મ્યપ્રકૃતિ કાઞ્ચિમધ્યગતમ્ ।
ઐન્દવકિશોરશેખરમૈદમ્પર્યં ચકાસ્તિ નિગમાનામ્ ॥ ૭॥

શ્રિતકમ્પસીમાનં શિથિલિતપરમશિવધૈર્યમહિમાનમ્ ।
કલયે પટલિમાનં કંચન કઞ્ચુકિતભુવનભૂમાનમ્ ॥ ૮॥

આદૃતકાઞ્ચીનિલયમાદ્યામારૂઢયૌવનાટોપામ્ ।
આગમવતંસકલિકામાનન્દાદ્વૈતકન્દલીં વન્દે ॥ ૯॥

તુઙ્ગાભિરામકુચભરશૃઙ્ગારિતમાશ્રયામિ કાઞ્ચિગતમ્ ।
ગઙ્ગાધરપરતન્ત્રં શૃઙ્ગારાદ્વૈતતન્ત્રસિદ્ધાન્તમ્ ॥ ૧૦॥

કાઞ્ચીરત્નવિભૂષાં કામપિ કન્દર્પસૂતિકાપાઙ્ગીમ્ ।
પરમાં કલામુપાસે પરશિવવામાઙ્કપીઠિકાસીનામ્ ॥ ૧૧॥

કમ્પાતીચરાણાં કરુણાકોરકિતદૃષ્ટિપાતાનામ્ ।
કેલીવનં મનો મે કેષાંચિદ્ભવતુ ચિદ્વિલાસાનામ્ ॥ ૧૨॥

આમ્રતરુમૂલવસતેરાદિમપુરુષસ્ય નયનપીયૂષમ્ ।
આરબ્ધયૌવનોત્સવમામ્નાયરહસ્યમન્તરવલમ્બે ॥ ૧૩॥

અધિકાઞ્ચિ પરમયોગિભિરાદિમપરપીઠસીમ્નિ દૃશ્યેન ।
અનુબદ્ધં મમ માનસમરુણિમસર્વસ્વસમ્પ્રદાયેન ॥ ૧૪॥

અઙ્કિતશંકરદેહામઙ્કુરિતોરોજકઙ્કણાશ્લેષૈઃ ।
અધિકાઞ્ચિ નિત્યતરુણીમદ્રાક્ષં કાંચિદદ્ભુતાં બાલામ્ ॥ ૧૫॥

મધુરધનુષા મહીધરજનુષા નન્દામિ સુરભિબાણજુષા ।
ચિદ્વપુષા કાઞ્ચિપુરે કેલિજુષા બન્ધુજીવકાન્તિમુષા ॥ ૧૬॥

મધુરસ્મિતેન રમતે માંસલકુચભારમન્દગમનેન ।
મધ્યેકાઞ્ચિ મનો મે મનસિજસામ્રાજ્યગર્વબીજેન ॥ ૧૭॥

ધરણિમયીં તરણિમયીં પવનમયીં ગગનદહનહોતૃમયીમ્ ।
અમ્બુમયીમિન્દુમયીમમ્બામનુકમ્પમાદિમામીક્ષે ॥ ૧૮॥

લીનસ્થિતિ મુનિહૃદયે ધ્યાનસ્તિમિતં તપસ્યદુપકમ્પમ્ ।
પીનસ્તનભરમીડે મીનધ્વજતન્ત્રપરમતાત્પર્યમ્ ॥ ૧૯॥

શ્વેતા મન્થરહસિતે શાતા મધ્યે ચ વાઙ્મનોઽતીતા ।
શીતા લોચનપાતે સ્ફીતા કુચસીમ્નિ શાશ્વતી માતા ॥ ૨૦॥

પુરતઃ કદા ન કરવૈ પુરવૈરિવિમર્દપુલકિતાઙ્ગલતામ્ ।
પુનતીં કાઞ્ચીદેશં પુષ્પાયુધવીર્યસરસપરિપાટીમ્ ॥ ૨૧॥

પુણ્યા કાઽપિ પુરન્ધ્રી પુઙ્ખિતકન્દર્પસમ્પદા વપુષા ।
પુલિનચરી કમ્પાયાઃ પુરમથનં પુલકનિચુલિતં કુરુતે ॥ ૨૨॥

તનિમાદ્વૈતવલગ્નં તરુણારુણસમ્પ્રદાયતનુલેખમ્ ।
તટસીમનિ કમ્પાયાસ્તરુણિમસર્વસ્વમાદ્યમદ્રાક્ષમ્ ॥ ૨૩॥

પૌષ્ટિકકર્મવિપાકં પૌષ્પશરં સવિધસીમ્નિ કમ્પાયાઃ ।
અદ્રાક્ષમાત્તયૌવનમભ્યુદયં કંચિદર્ધશશિમૌલેઃ ॥ ૨૪॥

સંશ્રિતકાઞ્ચીદેશે સરસિજદૌર્ભાગ્યજાગ્રદુત્તંસે ।
સંવિન્મયે વિલીયે સારસ્વતપુરુષકારસામ્રાજ્યે ॥ ૨૫॥

મોદિતમધુકરવિશિખં સ્વાદિમસમુદાયસારકોદણ્ડમ્ ।
આદૃતકાઞ્ચીખેલનમાદિમમારુણ્યભેદમાકલયે ॥ ૨૬॥

ઉરરીકૃતકાઞ્ચિપુરીમુપનિષદરવિન્દકુહરમધુધારામ્ ।
ઉન્નમ્રસ્તનકલશીમુત્સવલહરીમુપાસ્મહે શમ્ભોઃ ॥ ૨૭॥

એણશિશુદીર્ઘલોચનમેનઃપરિપન્થિ સન્તતં ભજતામ્ ।
એકામ્રનાથજીવિતમેવમ્પદદૂરમેકમવલમ્બે ॥ ૨૮॥

સ્મયમાનમુખં કાઞ્ચીભયમાનં કમપિ દેવતાભેદમ્ ।
દયમાનં વીક્ષ્ય મુહુર્વયમાનન્દામૃતામ્બુધૌ મગ્નાઃ ॥ ૨૯॥

કુતુકજુષિ કાઞ્ચિદેશે કુમુદતપોરાશિપાકશેખરિતે ।
કુરુતે મનોવિહારં કુલગિરિપરિબૃઢકુલૈકમણિદીપે ॥ ૩૦॥

વીક્ષેમહિ કાઞ્ચિપુરે વિપુલસ્તનકલશગરિમપરવશિતમ્ ।
વિદ્રુમસહચરદેહં વિભ્રમસમવાયસારસન્નાહમ્ ॥ ૩૧॥

કુરુવિન્દગોત્રગાત્રં કૂલચરં કમપિ નૌમિ કમ્પાયાઃ ।
કૂલંકષકુચકુમ્ભં કુસુમાયુધવીર્યસારસંરમ્ભમ્ ॥ ૩૨॥

કુડ્મલિતકુચકિશોરૈઃ કુર્વાણૈઃ કાઞ્ચિદેશસૌહાર્દમ્ ।
કુઙ્કુમશોણૈર્નિચિતં કુશલપથં શમ્ભુસુકૃતસમ્ભારૈઃ ॥ ૩૩॥

અઙ્કિતકચેન કેનચિદન્ધંકરણૌષધેન કમલાનામ્ ।
અન્તઃપુરેણ શમ્ભોરલંક્રિયા કાઽપિ કલ્પ્યતે કાઞ્ચ્યામ્ ॥ ૩૪॥

ઊરીકરોમિ સન્તતમૂષ્મલફાલેન લલિતં પુંસા ।
ઉપકમ્પમુચિતખેલનમુર્વીધરવંશસમ્પદુન્મેષમ્ ॥ ૩૫॥

અઙ્કુરિતસ્તનકોરકમઙ્કાલંકારમેકચૂતપતેઃ ।
આલોકેમહિ કોમલમાગમસંલાપસારયાથાર્થ્યમ્ ॥ ૩૬॥

પુઞ્જિતકરુણમુદઞ્ચિતશિઞ્જિતમણિકાઞ્ચિ કિમપિ કાઞ્ચિપુરે ।

મઞ્જરિતમૃદુલહાસં પિઞ્જરતનુરુચિ પિનાકિમૂલધનમ્ ॥ ૩૭॥

લોલહૃદયોઽસ્તિ શમ્ભોર્લોચનયુગલેન લેહ્યમાનાયામ્ ।
લલિતપરમશિવાયાં લાવણ્યામૃતતરઙ્ગમાલાયામ્ ॥ ૩૮॥

મધુકરસહચરચિકુરૈર્મદનાગમસમયદીક્ષિતકટાક્ષૈઃ ।
મણ્ડિતકમ્પાતીરૈર્મઙ્ગલકન્દૈર્મમાસ્તુ સારૂપ્યમ્ ॥ ૩૯॥

વદનારવિન્દવક્ષોવામાઙ્કતટીવશંવદીભૂતા ।
પૂરુષત્રિતયે ત્રેધા પુરન્ધ્રિરૂપા ત્વમેવ કામાક્ષિ ॥ ૪૦॥

બાધાકરીં ભવાબ્ધેરાધારાદ્યમ્બુજેષુ વિચરન્તીમ્ ।
આધારીકૃતકાઞ્ચી બોધામૃતવીચિમેવ વિમૃશામઃ ॥ ૪૧॥

કલયામ્યન્તઃ શશધરકલયાઽઙ્કિતમૌલિમમલચિદ્વલયામ્ ।
અલયામાગમપીઠીનિલયાં વલયાઙ્કસુન્દરીમમ્બામ્ ॥ ૪૨॥

શર્વાદિપરમસાધકગુર્વાનીતાય કામપીઠજુષે ।
સર્વાકૃતયે શોણિમગર્વાયાસ્મૈ સમર્પ્યતે હૃદયમ્ ॥ ૪૩॥

સમયા સાન્ધ્યમયૂખૈઃ સમયા બુદ્ધ્યા સદૈવ શીલિતયા ।
ઉમયા કાઞ્ચીરતયા ન મયા લભ્યતે કિં નુ તાદાત્મ્યમ્ ॥ ૪૪॥

જન્તોસ્તવ પદપૂજનસન્તોષતરઙ્ગિતસ્ય કામાક્ષિ ।
વન્ધ્યો યદિ ભવતિ પુનઃ સિન્ધોરમ્ભસ્સુ બમ્ભ્રમીતિ શિલા ॥ ૪૫॥

કુણ્ડલિ કુમારિ કુટિલે ચણ્ડિ ચરાચરસવિત્રિ ચામુણ્ડે ।
ગુણિનિ ગુહારિણિ ગુહ્યે ગુરુમૂર્તે ત્વાં નમામિ કામાક્ષિ ॥ ૪૬॥

અભિદાકૃતિર્ભિદાકૃતિરચિદાકૃતિરપિ ચિદાકૃતિર્માતઃ ।
અનહન્તા ત્વમહન્તા ભ્રમયસિ કામાક્ષિ શાશ્વતી વિશ્વમ્ ॥ ૪૭॥

શિવ શિવ પશ્યન્તિ સમં શ્રીકામાક્ષીકટાક્ષિતાઃ પુરુષાઃ ।
વિપિનં ભવનમમિત્રં મિત્રં લોષ્ટં ચ યુવતિબિમ્બોષ્ઠમ્ ॥ ૪૮॥

કામપરિપન્થિકામિનિ કામેશ્વરિ કામપીઠમધ્યગતે ।
કામદુઘા ભવ કમલે કામકલે કામકોટિ કામાક્ષિ ॥ ૪૯॥

મધ્યેહૃદયં મધ્યેનિટિલં મધ્યેશિરોઽપિ વાસ્તવ્યામ્ ।
ચણ્ડકરશક્રકાર્મુકચન્દ્રસમાભાં નમામિ કામાક્ષીમ્ ॥ ૫૦॥

અધિકાઞ્ચિ કેલિલોલૈરખિલાગમયન્ત્રતન્ત્રમયૈઃ ।
અતિશીતં મમ માનસમસમશરદ્રોહિજીવનોપાયૈઃ ॥ ૫૧॥

નન્દતિ મમ હૃદિ કાચન મન્દિરયન્તા નિરન્તરં કાઞ્ચીમ્ ।
ઇન્દુરવિમણ્ડલકુચા બિન્દુવિયન્નાદપરિણતા તરુણી ॥ ૫૨॥

શમ્પાલતાસવર્ણં સમ્પાદયિતું ભવજ્વરચિકિત્સામ્ ।
લિમ્પામિ મનસિ કિંચન કમ્પાતટરોહિ સિદ્ધભૈષજ્યમ્ ॥ ૫૩॥

અનુમિતકુચકાઠિન્યામધિવક્ષઃપીઠમઙ્ગજન્મરિપોઃ ।
આનન્દદાં ભજે તામાનઙ્ગબ્રહ્મતત્ત્વબોધસિરામ્ ॥ ૫૪॥

ઐક્ષિષિ પાશાઙ્કુશધરહસ્તાન્તં વિસ્મયાર્હવૃત્તાન્તમ્ ।
અધિકાઞ્ચિ નિગમવાચાં સિદ્ધાન્તં શૂલપાણિશુદ્ધાન્તમ્ ॥ ૫૫॥

આહિતવિલાસભઙ્ગીમાબ્રહ્મસ્તમ્બશિલ્પકલ્પનયા ।
આશ્રિતકાઞ્ચીમતુલામાદ્યાં વિસ્ફૂર્તિમાદ્રિયે વિદ્યામ્ ॥ ૫૬॥

મૂકોઽપિ જટિલદુર્ગતિશોકોઽપિ સ્મરતિ યઃ ક્ષણં ભવતીમ્ ।
એકો ભવતિ સ જન્તુર્લોકોત્તરકીર્તિરેવ કામાક્ષિ ॥ ૫૭॥

પઞ્ચદશવર્ણરૂપં કંચન કાઞ્ચીવિહારધૌરેયમ્ ।
પઞ્ચશરીયં શમ્ભોર્વઞ્ચનવૈદગ્ધ્યમૂલમવલમ્બે ॥ ૫૮॥

પરિણતિમતીં ચતુર્ધા પદવીં સુધિયાં સમેત્ય સૌષુમ્નીમ્ ।
પઞ્ચાશદર્ણકલ્પિતમદશિલ્પાં ત્વાં નમામિ કામાક્ષિ ॥ ૫૯॥

આદિક્ષન્મમ ગુરુરાડાદિક્ષાન્તાક્ષરાત્મિકાં વિદ્યામ્ ।
સ્વાદિષ્ઠચાપદણ્ડાં નેદિષ્ઠામેવ કામપીઠગતામ્ ॥ ૬૦॥

તુષ્યામિ હર્ષિતસ્મરશાસનયા કાઞ્ચિપુરકૃતાસનયા ।
સ્વાસનયા સકલજગદ્ભાસનયા કલિતશમ્બરાસનયા ॥ ૬૧॥

પ્રેમવતી કમ્પાયાં સ્થેમવતી યતિમનસ્સુ ભૂમવતી ।
સામવતી નિત્યગિરા સોમવતી શિરસિ ભાતિ હૈમવતી ॥ ૬૨॥

કૌતુકિના કમ્પાયાં કૌસુમચાપેન કીલિતેનાન્તઃ ।
કુલદૈવતેન મહતા કુડ્મલમુદ્રાં ધુનોતુ નઃપ્રતિભા ॥ ૬૩॥

યૂના કેનાપિ મિલદ્દેહા સ્વાહાસહાયતિલકેન ।
સહકારમૂલદેશે સંવિદ્રૂપા કુટુમ્બિની રમતે ॥ ૬૪॥

કુસુમશરગર્વસમ્પત્કોશગૃહં ભાતિ કાઞ્ચિદેશગતમ્ ।
સ્થાપિતમસ્મિન્કથમપિ ગોપિતમન્તર્મયા મનોરત્નમ્ ॥ ૬૫॥

દગ્ધષડધ્વારણ્યં દરદલિતકુસુમ્ભસમ્ભૃતારુણ્યમ્ ।
કલયે નવતારુણ્યં કમ્પાતટસીમ્નિ કિમપિ કારુણ્યમ્ ॥ ૬૬॥

અધિકાઞ્ચિ વર્ધમાનામતુલાં કરવાણિ પારણામક્ષ્ણોઃ ।
આનન્દપાકભેદામરુણિમપરિણામગર્વપલ્લવિતામ્ ॥ ૬૭॥

બાણસૃણિપાશકાર્મુકપાણિમમું કમપિ કામપીઠગતમ્ ।
એણધરકોણચૂડં શોણિમપરિપાકભેદમાકલયે ॥ ૬૮॥

કિં વા ફલતિ મમાન્યૈર્બિમ્બાધરચુમ્બિમન્દહાસમુખી ।
સમ્બાધકરી તમસામમ્બા જાગર્તિ મનસિ કામાક્ષી ॥ ૬૯॥

મઞ્ચે સદાશિવમયે પરિશિવમયલલિતપૌષ્પપર્યઙ્કે ।
અધિચક્રમધ્યમાસ્તે કામાક્ષી નામ કિમપિ મમ ભાગ્યમ્ ॥ ૭૦॥

રક્ષ્યોઽસ્મિ કામપીઠીલાસિકયા ઘનકૃપામ્બુરાશિકયા ।
શ્રુતિયુવતિકુન્તલીમણિમાલિકયા તુહિનશૈલબાલિકયા ॥ ૭૧॥

લીયે પુરહરજાયે માયે તવ તરુણપલ્લવચ્છાયે ।
ચરણે ચન્દ્રાભરણે કાઞ્ચીશરણે નતાર્તિસંહરણે ॥ ૭૨॥

મૂર્તિમતિ મુક્તિબીજે મૂર્ધ્નિ સ્તબકિતચકોરસામ્રાજ્યે ।
મોદિતકમ્પાકૂલે મુહુર્મુહુર્મનસિ મુમુદિષાઽસ્માકમ્ ॥ ૭૩॥

વેદમયીં નાદમયીં બિન્દુમયીં પરપદોદ્યદિન્દુમયીમ્ ।
મન્ત્રમયીં તન્ત્રમયીં પ્રકૃતિમયીં નૌમિ વિશ્વવિકૃતિમયીમ્ ॥ ૭૪॥

પુરમથનપુણ્યકોટી પુઞ્જિતકવિલોકસૂક્તિરસધાટી ।
મનસિ મમ કામકોટી વિહરતુ કરુણાવિપાકપરિપાટી ॥ ૭૫॥

કુટિલં ચટુલં પૃથુલં મૃદુલં કચનયનજઘનચરણેષુ ।
અવલોકિતમવલમ્બિતમધિકમ્પાતટમમેયમસ્માભિઃ ॥ ૭૬॥

પ્રત્યઙ્મુખ્યા દૃષ્ટ્યા પ્રસાદદીપાઙ્કુરેણ કામાક્ષ્યાઃ ।
પશ્યામિ નિસ્તુલમહો પચેલિમં કમપિ પરશિવોલ્લાસમ્ ॥ ૭૭॥

વિદ્યે વિધાતૃવિષયે કાત્યાયનિ કાલિ કામકોટિકલે ।

ભારતિ ભૈરવિ ભદ્રે શાકિનિ શામ્ભવિ શિવે સ્તુવે ભવતીમ્ ॥ ૭૮॥

માલિનિ મહેશચાલિનિ કાઞ્ચીખેલિનિ વિપક્ષકાલિનિ તે ।
શૂલિનિ વિદ્રુમશાલિનિ સુરજનપાલિનિ કપાલિનિ નમોઽસ્તુ ॥ ૭૯॥

દેશિક ઇતિ કિં શંકે તત્તાદૃક્તવ નુ તરુણિમોન્મેષઃ ।
કામાક્ષિ શૂલપાણેઃ કામાગમસમયદીક્ષાયામ્ ॥ ૮૦॥

વેતણ્ડકુમ્ભડમ્બરવૈતણ્ડિકકુચભરાર્તમધ્યાય ।
કુઙ્કુમરુચે નમસ્યાં શંકરનયનામૃતાય રચયામઃ ॥ ૮૧॥

અધિકાઞ્ચિતમણિકાઞ્ચનકાઞ્ચીમધિકાઞ્ચિ કાંચિદદ્રાક્ષમ્ ।
અવનતજનાનુકમ્પામનુકમ્પાકૂલમસ્મદનુકૂલામ્ ॥ ૮૨॥

પરિચિતકમ્પાતીરં પર્વતરાજન્યસુકૃતસન્નાહમ્ ।
પરગુરુકૃપયા વીક્ષે પરમશિવોત્સઙ્ગમઙ્ગલાભરણમ્ ॥ ૮૩॥

દગ્ધમદનસ્ય શમ્ભોઃ પ્રથીયસીં બ્રહ્મચર્યવૈદગ્ધીમ્ ।
તવ દેવિ તરુણિમશ્રીચતુરિમપાકો ન ચક્ષમે માતઃ ॥ ૮૪॥

મદજલતમાલપત્રા વસનિતપત્રા કરાદૃતખાનિત્રા ।
વિહરતિ પુલિન્દયોષા ગુઞ્જાભૂષા ફણીન્દ્રકૃતવેષા ॥ ૮૫॥

અઙ્કે શુકિની ગીતે કૌતુકિની પરિસરે ચ ગાયકિની ।
જયસિ સવિધેઽમ્બ ભૈરવમણ્ડલિની શ્રવસિ શઙ્ખકુણ્ડલિની ॥ ૮૬॥

પ્રણતજનતાપવર્ગા કૃતબહુસર્ગા સસિંહસંસર્ગા ।
કામાક્ષિ મુદિતભર્ગા હતરિપુવર્ગા ત્વમેવ સા દુર્ગા ॥ ૮૭॥

શ્રવણચલદ્વેતણ્ડા સમરોદ્દણ્ડા ધુતાસુરશિખણ્ડા ।
દેવિ કલિતાન્ત્રષણ્ડા ધૃતનરમુણ્ડા ત્વમેવ ચામુણ્ડા ॥ ૮૮॥

ઉર્વીધરેન્દ્રકન્યે દર્વીભરિતેન ભક્તપૂરેણ ।
ગુર્વીમકિંચનાર્તિ ખર્વીકુરુષે ત્વમેવ કામાક્ષિ ॥ ૮૯॥

તાડિતરિપુપરિપીડનભયહરણ નિપુણહલમુસલા ।
ક્રોડપતિભીષણમુખી ક્રીડસિ જગતિ ત્વમેવ કામાક્ષિ ॥ ૯૦॥

સ્મરમથનવરણલોલા મન્મથહેલાવિલાસમણિશાલા ।
કનકરુચિચૌર્યશીલા ત્વમમ્બ બાલા કરાબ્જધૃતમાલા ॥ ૯૧॥

વિમલપટી કમલકુટી પુસ્તકરુદ્રાક્ષશસ્તહસ્તપુટી ।
કામાક્ષિ પક્ષ્મલાક્ષી કલિતવિપઞ્ચી વિભાસિ વૈરિઞ્ચી ॥ ૯૨॥

કુઙ્કુમરુચિપિઙ્ગમસૃક્પઙ્કિલમુણ્ડાલિમણ્ડિતં માતઃ ।
શ્રીકામાક્ષિ તદીયસઙ્ગમકલામન્દીભવત્કૌતુકઃ
જયતિ તવ રૂપધેયં જપપટપુસ્તકવરાભયકરાબ્જમ્ ॥ ૯૩॥

કનકમણિકલિતભૂષાં કાલાયસકલહશીલકાન્તિકલામ્ ।
કામાક્ષિ શીલયે ત્વાં કપાલશૂલાભિરામકરકમલામ્ ॥ ૯૪॥

લોહિતિમપુઞ્જમધ્યે મોહિતભુવને મુદા નિરીક્ષન્તે ।
વદનં તવ કુવયુગલં કાઞ્ચીસીમાં ચ કેઽપિ કામાક્ષિ ॥ ૯૫॥

જલધિદ્વિગુણિતહુતબહદિશાદિનેશ્વરકલાશ્વિનેયદલૈઃ ।
નલિનૈર્મહેશિ ગચ્છસિ સર્વોત્તરકરકમલદલમમલમ્ ॥ ૯૬॥

સત્કૃતદેશિકચરણાઃ સબીજનિર્બીજયોગનિશ્રેણ્યા ।
અપવર્ગસૌધવલભીમારોહન્ત્યમ્બ કેઽપિ તવ કૃપયા ॥ ૯૭॥

અન્તરપિ બહિરપિ ત્વં જન્તુતતેરન્તકાન્તકૃદહન્તે ।
ચિન્તિતસન્તાનવતાં સન્તતમપિ તન્તનીષિ મહિમાનમ્ ॥ ૯૮॥

કલમઞ્જુલવાગનુમિતગલપઞ્જરગતશુકગ્રહૌત્કણ્ઠ્યાત્ ।
અમ્બ રદનામ્બરં તે બિમ્બફલં શમ્બરારિણા ન્યસ્તમ્ ॥ ૯૯॥

જય જય જગદમ્બ શિવે જય જય કામાક્ષિ જય જયાદ્રિસુતે ।
જય જય મહેશદયિતે જય જય ચિદ્ગગનકૌમુદીધારે ॥ ૧૦૦॥

આર્યાશતકં ભક્ત્યા પઠતામાર્યાકટાક્ષેણ ।
નિસ્સરતિ વદનકમલાદ્વાણી પીયૂષધોરણી દિવ્યા ॥ ૧૦૧॥

આર્યાશતકં સમ્પૂર્ણમ્ ॥

## ॥ પાદારવિન્દશતકમ્ ॥

મહિમ્નઃ પન્થાનં મદનપરિપન્થિપ્રણયિનિ
પ્રભુર્નિર્ણેતું તે ભવતિ યતમાનોઽપિ કતમઃ ।
તથાપિ શ્રીકાઞ્ચીવિહૃતિરસિકે કોઽપિ મનસો
વિપાકસ્ત્વત્પાદસ્તુતિવિધિષુ જલ્પાકયતિ મામ્ ॥ ૧॥

ગલગ્રાહી પૌરન્દરપુરવનીપલ્લવરુચાં
ધૃતપાથમ્યાનામરુણમહસામાદિમગુરુઃ ।
સમિન્ધે બન્ધૂકસ્તબકસહયુધ્વા દિશિ દિશિ
પ્રસર્પન્કામાક્ષ્યાશ્ચરણકિરણાનામરુણિમા ॥ ૨॥

મરાલીનાં યાનાભ્યસનકલનામૂલગુરવે
દરિદ્રાણાં ત્રાણવ્યતિકરસુરોદ્યાનતરવે ।
તમસ્કાણ્ડપ્રૌઢિપ્રકટનતિરસ્કારપટવે
જનોઽયં કામાક્ષ્યાશ્ચરણનલિનાય સ્પૃહયતે ॥ ૩॥

વહન્તી સૈન્દૂરીં સરણિમવનમ્રામરપુરી-
પુરન્ધ્રીસીમન્તે કવિકમલબાલાર્કસુષમા ।
ત્રયીસીમન્તિન્યાઃ સ્તનતટનિચોલારુણપટી
વિભાન્તી કામાક્ષ્યાઃ પદનલિનકાન્તિર્વિજયતે ॥ ૪॥

પ્રણમ્રીભૂતસ્ય પ્રણયકલહત્રસ્તમનસઃ
સ્મરારાતેશ્ચૂડાવિયતિ ગૃહમેધી હિમકરઃ ।
યયોઃ સાન્ધ્યાં કાન્તિં વહતિ સુષમાભિશ્ચરણયોઃ
તયોર્મે કામાક્ષ્યા હૃદયમપતન્દ્રં વિહરતામ્ ॥ ૫॥

યયોઃ પીઠાયન્તે વિબુધમુકુટીનાં પટલિકા
યયોઃ સૌધાયન્તે સ્વયમુદયભાજો ભણિતયઃ ।
યયોઃ દાસાયન્તે સરસિજભવાદ્યાશ્ચરણયોઃ
તયોર્મે કામાક્ષ્યા દિનમનુ વરીવર્તુ હૃદયમ્ ॥ ૬॥

નયન્તી સંકોચં સરસિજરુચં દિક્પરિસરે
સૃજન્તી લૌહિત્યં નખકિરણચન્દ્રાર્ધખચિતા ।
કવીન્દ્રાણાં હૃત્કૈરવવિકસનોદ્યોગજનની
સ્ફુરન્તી કામાક્ષ્યાઃ ચરણરુચિસન્ધ્યા વિજયતે ॥ ૭॥

વિરાવૈર્માઞ્જીરૈઃ કિમપિ કથયન્તીવ મધુરં
પુરસ્તાદાનમ્રે પુરવિજયિનિ સ્મેરવદને ।

વયસ્યેવ પ્રૌઢા શિથિલયતિ યા પ્રેમકલહ-
પ્રરોહં કામાક્ષ્યાઃ ચરણયુગલી સા વિજયતે ॥ ૮॥

સુપર્વસ્ત્રીલોલાલકપરિચિતં ષટ્પદકુલૈઃ
સ્ફુરલ્લાક્ષારાગં તરુણતરણિજ્યોતિરરુણૈઃ ।
ભૃતં કાન્ત્યમ્ભોભિઃ વિસૃમરમરન્દૈઃ સરસિજૈઃ
વિધત્તે કામાક્ષ્યાઃ ચરણયુગલં બન્ધુપદવીમ્ ॥ ૯॥

રજઃસંસર્ગેઽપિ સ્થિતમરજસામેવ હૃદયે
પરં રક્તત્વેન સ્થિતમપિ વિરક્તૈકશરણમ્ ।
અલભ્યં મન્દાનાં દધદપિ સદા મન્દગતિતાં
વિધત્તે કામાક્ષ્યાઃ ચરણયુગમાશ્ચર્યલહરીમ્ ॥ ૧૦॥

જટાલા મઞ્જીરસ્ફુરદરુણરત્નાંશુનિકરૈઃ
નિષિદન્તી મધ્યે નખરુચિઝરીગાઙ્ગપયસામ્ ।
જગત્ત્રાણં કર્તું જનનિ મમ કામાક્ષિ નિયતં
તપશ્ચર્યાં ધત્તે તવ ચરણપાથોજયુગલી ॥ ૧૧॥

તુલાકોટિદ્વન્દ્વક્કણિતભણિતાભીતિવચસોઃ
વિનમ્રં કામાક્ષી વિસૃમરમહઃપાટલિતયોઃ ।
ક્ષણં વિન્યાસેન ક્ષપિતતમસોર્મે લલિતયોઃ
પુનીયાન્મૂર્ધાનં પુરહરપુરન્ધ્રી ચરણયોઃ ॥ ૧૨॥

ભવાનિ દ્રુહ્યેતાં ભવનિબિડિતેભ્યો મમ મુહુ-
સ્તમોવ્યામોહેભ્યસ્તવ જનનિ કામાક્ષિ ચરણૌ ।
યયોર્લાક્ષાબિન્દુસ્ફુરણધરણાદ્ધ્વર્જટિજટા-
કુટીરા શોણાઙ્કં વહતિ વપુરેણાઙ્કકલિકા ॥ ૧૩॥

પવિત્રીકુર્યુર્નઃ પદતલભુવઃ પાટલરુચઃ
પરાગાસ્તે પાપપ્રશમનધુરીણાઃ પરશિવે ।
કણં લબ્ધું યેષાં નિજશિરસિ કામાક્ષિ વિવશા
વલન્તો વ્યાતન્વન્ત્યહમહમિકાં માધવમુખાઃ ॥ ૧૪॥

બલાકામાલાભિર્નખરુચિમયીભિઃ પરિવૃતે
વિનમ્રસ્વર્નારીવિકચકચકાલામ્બુદકુલે ।
સ્ફુરન્તઃ કામાક્ષિ સ્ફુટદલિતબન્ધૂકસુહૃદ-
સ્તટિલ્લેખાયન્તે તવ ચરણપાથોજકિરણાઃ ॥ ૧૫॥

સરાગઃ સદ્વેષઃ પ્રસૃમરસરોજે પ્રતિદિનં
નિસર્ગાદાક્રામન્વિબુધજનમૂર્ધાનમધિકમ્ ।
કથંકારં માતઃ કથય પદપદ્મસ્તવ સતાં
નતાનાં કામાક્ષિ પ્રકટયતિ કૈવલ્યસરણિમ્ ॥ ૧૬॥

જપાલક્ષ્મીશોણો જનિતપરમજ્ઞાનનલિની-
વિકાસવ્યાસઙ્ગો વિફલિતજગજ્જાડ્યગરિમા ।
મનઃપૂર્વાદ્રિં મે તિલકયતુ કામાક્ષિ તરસા
તમસ્કાણ્ડદ્રોહી તવ ચરણપાથોજરમણઃ ॥ ૧૭॥

નમસ્કુર્મઃ પ્રેઙ્ખન્મણિકટકનીલોત્પલમહઃ-
પયોધૌ રિઙ્ખદ્ભિર્નખકિરણફેનૈર્ધવલિતે ।
સ્ફુટં કુર્વાણાય પ્રબલચલદૌર્વાનલશિખા-
વિતર્કં કામાક્ષ્યાઃ સતતમરુણિમ્ને ચરણયોઃ ॥ ૧૮॥

શિવે પાશાયેતામલઘુનિ તમઃકૂપકુહરે
દિનાધીશાયેતાં મમ હૃદયપાથોજવિપિને ।
નભોમાસાયેતાં સરસકવિતારીતિસરિતિ
ત્વદીયૌ કામાક્ષિ પ્રસૃતકિરણૌ દેવિ ચરણૌ ॥ ૧૯॥

નિષક્તં શ્રુત્યન્તે નયનમિવ સદ્વૃત્તરુચિરૈઃ
સમૈર્જુષ્ટં શુદ્ધૈરધરમિવ રમ્યૈર્દ્વિજગણૈઃ ।
શિવે વક્ષોજન્મદ્વિતયમિવ મુક્તાશ્રિતમુમે
ત્વદીયં કામાક્ષિ પ્રણતશરણં નૌમિ ચરણમ્ ॥ ૨૦॥

નમસ્યાસંસજ્જન્નમુચિપરિપન્થિપ્રણયિની-
નિસર્ગપ્રેઙ્ખોલત્કુરલકુલકાલાહિશબલે ।
નખચ્છાયાદુગ્ધોદધિપયસિ તે વૈદ્રુમરુચાં
પ્રચારં કામાક્ષિ પ્રચુરયતિ પાદાબ્જસુષમા ॥ ૨૧॥

કદા દૂરીકર્તું કટુદુરિતકાકોલજનિતં
મહાન્તં સન્તાપં મદનપરિપન્થિપ્રિયતમે ।
ક્ષણાત્તે કામાક્ષિ ત્રિભુવનપરીતાપહરણે
પટીયાંસં લપ્સ્યે પદકમલસેવામૃતરસમ્ ॥ ૨૨॥

યયોઃ સાન્ધ્યં રોચિઃ સતતમરુણિમ્ને સ્પૃહયતે

યયોશ્ચાન્દ્રી કાન્તિઃ પરિપતતિ દૃષ્ટ્વા નખરુચિમ્ ।
યયોઃ પાકોદ્રેકં પિપઠિષતિ ભક્ત્યા કિસલયં
મ્રદિમ્નઃ કામાક્ષ્યા મનસિ ચરણૌ તૌ તનુમહે ॥ ૨૩॥

જગન્નેદં નેદં પરમિતિ પરિત્યજ્ય યતિભિઃ
કુશાગ્રીયસ્વાન્તૈઃ કુશલધિષણૈઃ શાસ્ત્રસરણૌ ।
ગવેષ્યં કામાક્ષિ ધ્રુવમકૃતકાનાં ગિરિસુતે
ગિરામૈદમ્પર્યં તવ ચરણપદ્મં વિજયતે ॥ ૨૪॥

કૃતસ્નાનં શાસ્ત્રામૃતસરસિ કામાક્ષિ નિતરાં
દધાનં વૈશદ્યં કલિતરસમાનન્દસુધયા ।
અલંકારં ભૂમેર્મુનિજનમનશ્ચિન્મયમહા-
પયોધેરન્તસ્સ્થં તવ ચરણરત્નં મૃગયતે ॥ ૨૫॥

મનોગેહે મોહોદ્ભવતિમિરપૂર્ણે મમ મુહુઃ
દરિદ્રાણીકુર્વન્દિનકરસહસ્રાણિ કિરણૈઃ ।
વિધત્તાં કામાક્ષિ પ્રસૃમરતમોવઞ્ચનચણઃ
ક્ષણાર્ધં સાન્નિધ્યં ચરણમણિદીપો જનનિ તે ॥ ૨૬॥

કવીનાં ચેતોવન્નખરરુચિસમ્પર્કિ વિબુધ-
સ્રવન્તીસ્રોતોવત્પટુમુખરિતં હંસકરવૈઃ ।
દિનારમ્ભશ્રીવન્નિયતમરુણચ્છાયસુભગં
મદન્તઃ કામાક્ષ્યાઃ સ્ફુરતુ પદપઙ્કેરુહયુગમ્ ॥ ૨૭॥

સદા કિં સમ્પર્કાત્પ્રકૃતિકઠિનૈર્નાકિમુકુટૈઃ
તટૈર્નીહારાદ્રેરધિકમણુના યોગિમનસા ।
વિભિન્તે સંમોહં શિશિરયતિ ભક્તાનપિ દૃશામ્
અદૃશ્યં કામાક્ષિ પ્રકટયતિ તે પાદયુગલમ્ ॥ ૨૮॥

પવિત્રાભ્યામમ્બ પ્રકૃતિમૃદુલાભ્યાં તવ શિવે
પદાભ્યાં કામાક્ષિ પ્રસભમભિભૂતૈઃ સચકિતૈઃ ।
પ્રવાલૈરમ્ભોજૈરપિ ચ વનવાસવ્રતદશાઃ
સદૈવારભ્યન્તે પરિચરિતનાનાદ્વિજગણૈઃ ॥ ૨૯॥

ચિરાદૃશ્યા હંસૈઃ કથમપિ સદા હંસસુલભં
નિરસ્યન્તી જાડ્યં નિયતજડમધ્યૈકશરણમ્ ।
અદોષવ્યાસઙ્ગા સતતમપિ દોષાપ્તિમલિનં

પયોજં કામાક્ષ્યાઃ પરિહસતિ પાદાબ્જયુગલી ॥ ૩૦॥

સુરાણામાનન્દપ્રબલનતયા મણ્ડનતયા
નખેન્દુજ્યોત્સ્નાભિર્વિસૃમરતમઃખણ્ડનતયા ।
પયોજશ્રીદ્વેષવ્રતરતતયા ત્વચ્ચરણયોઃ
વિલાસઃ કામાક્ષિ પ્રકટયતિ નૈશાકરદશામ્ ॥ ૩૧॥

સિતિમ્ના કાન્તીનાં નખરજનુષાં પાદનલિન-
ચ્છવીનાં શોણિમ્ના તવ જનનિ કામાક્ષિ નમને ।
લભન્તે મન્દારગ્રથિતનવબન્ધૂકકુસુમ-
સ્રજાં સામીચીન્યં સુરપુરપુરન્ધ્રીકચભરાઃ ॥ ૩૨॥

સ્ફુરન્મધ્યે શુદ્ધે નખકિરણદુગ્ધાબ્ધિપયસાં
વહન્નબ્જં ચક્રં દરમપિ ચ લેખાત્મકતયા ।
શ્રિતો માત્સ્યં રૂપં શ્રિયમપિ દધાનો નિરુપમાં
ત્રિધામા કામાક્ષ્યાઃ પદનલિનનામા વિજયતે ॥ ૩૩॥

નખશ્રીસન્નદ્ધસ્તબકનિચિતઃ સ્વૈશ્ચ કિરણૈઃ
પિશઙ્ગૈઃ કામાક્ષિ પ્રકટિતલસત્પલ્લવરુચિઃ ।
સતાં ગમ્યઃ શઙ્કે સકલફલદાતા સુરતરુઃ
ત્વદીયઃ પાદોઽયં તુહિનગિરિરાજન્યતનયે ॥ ૩૪॥

વષટ્કુર્વન્માઞ્જીરકલકલૈઃ કર્મલહરી-
હવીંષિ પ્રૌદ્દણ્ડં જ્વલતિ પરમજ્ઞાનદહને ।
મહીયાન્કામાક્ષિ સ્ફુટમહસિ જોહોતિ સુધિયાં
મનોવેદ્યાં માતસ્તવ ચરણયજ્વા ગિરિસુતે ॥ ૩૫॥

મહામન્ત્રં કિંચિન્મણિકટકનાદૈર્મૃદુ જપન્
ક્ષિપન્દિક્ષુ સ્વચ્છં નખરુચિમયં ભાસ્મનરજઃ ।
નતાનાં કામાક્ષિ પ્રકૃતિપટુરચ્ચાટ્ય મમતા-
પિશાચીં પાદોઽયં પ્રકટયતિ તે માન્ત્રિકદશામ્ ॥ ૩૬॥

ઉદીતે બોધેન્દૌ તમસિ નિતરાં જગ્મુષિ દશાં
દરિદ્રાં કામાક્ષિ પ્રકટમનુરાગં વિદધતી ।
સિતેનાચ્છાદ્યાઙ્ગં નખરુચિપટેનાઙ્ઘ્રિયુગલી-
પુરન્ધ્રી તે માતઃ સ્વયમભિસરત્યેવ હૃદયમ્ ॥ ૩૭॥

દિનારમ્ભઃ સમ્પન્નલિનવિપિનાનામભિનવો
વિકાસો વાસન્તઃ સુકવિપિકલોકસ્ય નિયતઃ ।
પ્રદોષઃ કામાક્ષિ પ્રકટપરમજ્ઞાનશશિન-
શ્ચકાસ્તિ ત્વત્પાદસ્મરણમહિમા શૈલતનયે ॥ ૩૮॥

ધૃતચ્છાયં નિત્યં સરસિરુહમૈત્રીપરિચિતં
નિધાનં દીપ્તીનાં નિખિલજગતાં બોધજનકમ્ ।
મુમુક્ષૂણાં માર્ગપ્રથનપટુ કામાક્ષિ પદવીં
પદં તે પાતઙ્ગીં પરિકલયતે પર્વતસુતે ॥ ૩૯॥

શનૈસ્તીર્ત્વા મોહામ્બુધિમથ સમારોઢુમનસઃ
ક્રમાત્કૈવલ્યાખ્યાં સુકૃતિસુલભાં સૌધવલભીમ્ ।
લભન્તે નિઃશ્રેણીમિવ ઝટિતિ કામાક્ષિ ચરણં
પુરશ્ચર્યાભિસ્તે પુરમથનસીમન્તિનિ જનાઃ ॥ ૪૦॥

પ્રચણ્ડાર્તિક્ષોભપ્રમથનકૃતે પ્રાતિભસરિ-
ત્પ્રવાહપ્રોદ્દણ્ડીકરણજલદાય પ્રણમતામ્ ।
પ્રદીપાય પ્રૌઢે ભવતમસિ કામાક્ષિ ચરણ-
પ્રસાદૌન્મુખ્યાય સ્પૃહયતિ જનોઽયં જનનિ તે ॥ ૪૧॥

મરુદ્ભિઃ સંસેવ્યા સતતમપિ ચાઞ્ચલ્યરહિતા
સદારુણ્યં યાન્તી પરિણતિદરિદ્રાણસુષમા ।
ગુણોત્કર્ષાન્માઞ્જીરકકલકલૈસ્તર્જનપટુઃ
પ્રવાલં કામાક્ષ્યાઃ પરિહસતિ પાદાબ્જયુગલી ॥ ૪૨॥

જગદ્રક્ષાદક્ષા જલજરુચિશિક્ષાપટુતરા
સમૈર્નમ્યા રમ્યા સતતમભિગમ્યા બુધજનૈઃ ।
દ્વયી લીલાલોલા શ્રુતિષુ સુરપાલાદિમુકુટી-
તટીસીમાધામા તવ જનનિ કામાક્ષિ પદયોઃ ॥ ૪૩॥

ગિરાં દૂરૌ ચોરૌ જડિમતિમિરાણાં કૃતજગ-
ત્પરિત્રાણૌ શોણૌ મુનિહૃદયલીલૈકનિપુણૌ ।
નખૈઃ સ્મેરૌ સારૌ નિગમવચસાં ખણ્ડિતભવ-
ગ્રહોન્માદૌ પાદૌ તવ જનનિ કામાક્ષિ કલયે ॥ ૪૪॥

અવિશ્રાન્તં પઙ્કું યદપિ કલયન્યાવકમયં
નિરસ્યન્કામાક્ષિ પ્રણમનજુષાં પઙ્કમખિલમ્ ।

તુલાકોટિદ્વન્દ્વં દધદપિ ચ ગચ્છન્નતુલતાં
ગિરાં માર્ગં પાદો ગિરિવરસુતે લઙ્ઘયતિ તે ॥ ૪૫॥

પ્રવાલં સવ્રીલં વિપિનવિવરે વેપયતિ યા
સ્ફુરલ્લીલં બાલાતપમધિકબાલં વદતિ યા ।
રુચિં સાન્ધ્યાં વન્ધ્યાં વિરચયતિ યા વર્ધયતુ સા
શિવં મે કામાક્ષ્યાઃ પદનલિનપાટલ્યલહરી ॥ ૪૬॥

કિરઞ્જ્યોત્સ્નારીતિં નખમુખરુચા હંસમનસાં
વિતન્વાનઃ પ્રીતિં વિકચતરુણામ્ભોરુહરુચિઃ ।
પ્રકાશઃ શ્રીપાદસ્તવ જનનિ કામાક્ષિ તનુતે
શરત્કાલપ્રૌઢિં શશિશકલચૂડપ્રિયતમે ॥ ૪૭॥

નખાઙ્કૂરસ્મેરદ્યુતિવિમલગઙ્ગામ્ભસિ સુખં
કૃતસ્નાનં જ્ઞાનામૃતમમલમાસ્વાદ્ય નિયતમ્ ।
ઉદઞ્ચન્મઞ્જીરસ્ફુરણમણિદીપે મમ મનો
મનોજ્ઞે કામાક્ષ્યાશ્ચરણમણિહર્મ્યે વિહરતામ્ ॥ ૪૮॥

ભવામ્ભોધૌ નૌકાં જડિમવિપિને પાવકશિખા-
મમર્ત્યેન્દ્રાદીનામધિમુકુટમુત્તંસકલિકામ્ ।
જગત્તાપે જ્યોત્સ્નામકૃતકવચઃપઞ્જરપુટે
શુકસ્ત્રીં કામાક્ષ્યા મનસિ કલયે પાદયુગલીમ્ ॥ ૪૯॥

પરાત્મપ્રાકાશ્યપ્રતિફલનચુઞ્ચુઃ પ્રણમતાં
મનોજ્ઞસ્ત્વત્પાદો મણિમુકુરમુદ્રાં કલયતે ।
યદીયાં કામાક્ષિ પ્રકૃતિમસૃણાઃ શોધકદશાં
વિધાતું ચેષ્ટન્તે બલરિપુવધૂટીકચભરાઃ ॥ ૫૦॥

અવિશ્રાન્તં તિષ્ઠન્નકૃતકવચઃકન્દરપુટી-
કુટીરાન્તઃ પ્રૌઢં નખરુચિસટાલીં પ્રકટયન્ ।
પ્રચણ્ડં ખણ્ડત્વં નયતુ મમ કામાક્ષિ તરસા
તમોવેતણ્ડેન્દ્રં તવ ચરણકણ્ઠીરવપતિઃ ॥ ૫૧॥

પુરસ્તાત્કામાક્ષિ પ્રચુરરસમાખણ્ડલપુરી-
પુરન્ધ્રીણાં લાસ્યં તવ લલિતમાલોક્ય શનકૈઃ ।
નખશ્રીભિઃ સ્મેરા બહુ વિતનુતે નૂપુરરવૈ-
શ્ચમત્કૃત્યા શઙ્કે ચરણયુગલી ચાટુરચનાઃ ॥ ૫૨॥

સરોજં નિન્દન્તી નખકિરણકર્પૂરશિશિરા
નિષિક્તા મારારેર્મુકુટશશિરેખાહિમજલૈઃ ।
સ્ફુરન્તી કામાક્ષિ સ્ફુટરુચિમયે પલ્લવચયે
તવાધત્તે મૈત્રીં પથિકસુદૃશા પાદયુગલી ॥ ૫૩॥

નતાનાં સમ્પત્તેરનવરતમાકર્ષણજપઃ
પ્રરોહત્સંસારપ્રસરગરિમસ્તમ્ભનજપઃ ।
ત્વદીયઃ કામાક્ષિ સ્મરહરમનોમોહનજપઃ
પટીયાન્નઃ પાયાત્પદનલિનમઞ્જીરનિનદઃ ॥ ૫૪॥

વિતન્વીથા નાથે મમ શિરસિ કામાક્ષિ કૃપયા
પદામ્ભોજન્યાસં પશુપરિબૃઢપ્રાણદયિતે ।
પિબન્તો યન્મુદ્રાં પ્રકટમુપકમ્પાપરિસરં
દૃશા નાનન્દ્યન્તે નલિનભવનારાયણમુખાઃ ॥ ૫૫॥

પ્રણામોદ્યદ્બૃન્દારમુકુટમન્દારકલિકા-
વિલોલલ્લોલમ્બપ્રકરમયધૂમપ્રચુરિમા ।
પ્રદીપ્તઃ પાદાબ્જદ્યુતિવિતતિપાટલ્યલહરી-
કૃશાનુઃ કામાક્ષ્યા મમ દહતુ સંસારવિપિનમ્ ॥ ૫૬॥

વલક્ષશ્રીરૃક્ષાધિપશિશુસદૃક્ષૈસ્તવ નખૈઃ
જિઘૃક્ષુર્દક્ષત્વં સરસિરુહભિક્ષુત્વકરણે ।
ક્ષણાન્મે કામાક્ષિ ક્ષપિતભવસંક્ષોભગરિમા
વચોવૈચક્ષન્યં ચરણયુગલી પક્ષ્મલયતાત્ ॥ ૫૭॥

સમન્તાત્કામાક્ષિ ક્ષતતિમિરસન્તાનસુભગાન્
અનન્તાભિર્ભાભિર્દિનમનુ દિગન્તાન્વિરચયન્ ।
અહન્તાયા હન્તા મમ જડિમદન્તાવલહરિઃ
વિભિન્તાં સન્તાપં તવ ચરણચિન્તામણિરસૌ ॥ ૫૮॥

દધાનો ભાસ્વત્તામમૃતનિલયો લોહિતવપુઃ
વિનમ્રાણાં સૌમ્યો ગુરુરપિ કવિત્વં ચ કલયન્ ।
ગતૌ મન્દો ગઙ્ગાધરમહિષિ કામાક્ષિ ભજતાં
તમઃકેતુર્માતસ્તવ ચરણપદ્મો વિજયતે ॥ ૫૯॥

નયન્તીં દાસત્વં નલિનભવમુખ્યાનસુલભ-

પ્રદાનાદ્દીનાનામમરતરુદૌર્ભાગ્યજનનીમ્ ।
જગજ્જન્મક્ષેમક્ષયવિધિષુ કામાક્ષિ પદયો-
ર્ધુરીણામીષ્ટે કરસ્તવ ભણિતુમાહોપુરુષિકામ્ ॥ ૬૦॥

જનોઽયં સન્તપ્તો જનનિ ભવચણ્ડાંશુકિરણૈઃ
અલબ્ધ્વૈકં શીતં કણમપિ પરજ્ઞાનપયસઃ ।
તમોમાર્ગે પાન્થસ્તવ ઝટિતિ કામાક્ષિ શિશિરાં
પદામ્ભોજચ્છાયાં પરમશિવજાયે મૃગયતે ॥ ૬૧॥

જયત્યમ્બ શ્રીમન્નખકિરણચીનાંશુકમયં
વિતાનં બિભ્રાણે સુરમુકુટસંઘટ્ટમસૃણે ।
નિજારુણ્યક્ષૌમાસ્તરણવતિ કામાક્ષિ સુલભા
બુધૈઃ સંવિન્નારી તવ ચરણમાણિક્યભવને ॥ ૬૨॥

પ્રતીમઃ કામાક્ષિ સ્ફુરિતતરુણાદિત્યકિરણ-
શ્રિયો મૂલદ્રવ્યં તવ ચરણમદ્રીન્દ્રતનયે ।
સુરેન્દ્રાશામાપૂરયતિ યદસૌ ધ્વાન્તમખિલં
ધુનીતે દિગ્ભાગાનપિ ચ મહસા પાટલયતે ॥ ૬૩॥

મહાભાષ્યવ્યાખ્યાપટુશયનમારોપયતિ વા
સ્મરવ્યાપારેર્ષ્યાપિશુનનિટિલં કારયતિ વા ।
દ્વિરેફાણામધ્યાસયતિ સતતં વાધિવસતિં
પ્રણમ્રાન્કામાક્ષ્યાઃ પદનલિનમાહાત્મ્યગરિમા ॥ ૬૪॥

વિવેકામ્ભસ્સ્રોતસ્સ્નપનપરિપાટીશિશિરિતે
સમીભૂતે શાસ્ત્રસ્મરણહલસંકર્ષણવશાત્ ।
સતાં ચેતઃક્ષેત્રે વપતિ તવ કામાક્ષિ ચરણો
મહાસંવિત્સસ્યપ્રકરવરબીજં ગિરિસુતે ॥ ૬૫॥

દધાનો મન્દારસ્તબકપરિપાટીં નખરુચા
વહન્દીપ્તાં શોણાઙ્ગુલિપટલચામ્પેયકલિકામ્ ।
અશોકોલ્લાસં નઃ પ્રચુરયતુ કામાક્ષિ ચરણો
વિકાસી વાસન્તઃ સમય ઇવ તે શર્વદયિતે ॥ ૬૬॥

નખાંશુપ્રાચુર્યપ્રસૃમરમરાલાલિધવલઃ
સ્ફુરન્મઞ્જીરોદ્યન્મરકતમહશ્શૈવલયુતઃ ।
ભવત્યાઃ કામાક્ષિ સ્ફુટચરણપાટલ્યકપટો

નદઃ શોણાભિખ્યો નગપતિતનૂજે વિજયતે ॥ ૬૭॥

ધુનાનં પઙ્કૌઘં પરમસુલભં કણ્ટકકુલૈઃ
વિકાસવ્યાસઙ્ગં વિદધદપરાધીનમનિશમ્ ।
નખેન્દુજ્યોત્સ્નાભિર્વિશદરુચિ કામાક્ષિ નિતરામ્
અસામાન્યં મન્યે સરસિજમિદં તે પદયુગમ્ ॥ ૬૮॥

કરીન્દ્રાય દ્રુહ્યત્યલસગતિલીલાસુ વિમલૈઃ
પયોજૈર્માત્સર્યં પ્રકટયતિ કામં કલયતે ।
પદામ્ભોજદ્વન્દ્વં તવ તદપિ કામાક્ષિ હૃદયં
મુનીનાં શાન્તાનાં કથમનિશમસ્મૈ સ્પૃહયતે ॥ ૬૯॥

નિરસ્તા શોણિમ્ના ચરણકિરણાનાં તવ શિવે
સમિન્ધાના સન્ધ્યારુચિરચલરાજન્યતનયે ।
અસામર્થ્યાદેનં પરિભવિતુમેતત્સમરુચાં
સરોજાનાં જાને મુકુલયતિ શોભાં પ્રતિદિનમ્ ॥ ૭૦॥

ઉપાદિક્ષદ્દાક્ષ્યં તવ ચરણનામા ગુરુરસૌ
મરાલાનાં શઙ્કે મસૃણગતિલાલિત્યસરણૌ ।
અતસ્તે નિસ્તન્દ્રં નિયતમમુના સખ્યપદવીં
પ્રપન્નં પાથોજં પ્રતિ દધતિ કામાક્ષિ કુતુકમ્ ॥ ૭૧॥

દધાનૈઃ સંસર્ગં પ્રકૃતિમલિનૈઃ ષટ્પદકુલૈઃ
દ્વિજાધીશશ્લાઘાવિધિષુ વિદધદ્ભિર્મુકુલતામ્ ।
રજોમિશ્રૈઃ પદ્મૈર્નિયતમપિ કામાક્ષિ પદયોઃ
વિરોધસ્તે યુક્તો વિષમશરવૈરિપ્રિયતમે ॥ ૭૨॥

કવિત્વશ્રીમિશ્રીકરણનિપુણૌ રક્ષણચણૌ
વિપન્નાનાં શ્રીમન્નલિનમસૃણૌ શોણકિરણૌ ।
મુનીન્દ્રાણામન્તઃકરણશરણૌ મન્દસરણૌ
મનોજ્ઞૌ કામાક્ષ્યા દુરિતહરણૌ નૌમિ ચરણૌ ॥ ૭૩॥

પરસ્માત્સર્વસ્માદપિ ચ પરયોર્મુક્તિકરયોઃ
નખશ્રીભિર્જ્યોત્સ્નાકલિતતુલયોસ્તામ્રતલયોઃ ।
નિલીયે કામાક્ષ્યા નિગમનુતયોર્નાકિનતયોઃ
નિરસ્તપ્રોન્મીલન્નલિનમદયોરેવ પદયોઃ ॥ ૭૪॥

સ્વભાવાદન્યોન્યં કિસલયમપીદં તવ પદં
મ્રદિમ્ના શોણિમ્ના ભગવતિ દધાતે સદૃશતામ્ ।
વને પૂર્વસ્યેચ્છા સતતમવને કિં તુ જગતાં
પરસ્યેત્થં ભેદઃ સ્ફુરતિ હૃદિ કામાક્ષિ સુધિયામ્ ॥ ૭૫॥

કથં વાચાલોઽપિ પ્રકટમણિમઞ્જીરનિનદૈઃ
સદૈવાનન્દાર્દ્રાન્વિરચયતિ વાચંયમજનાન્ ।
પ્રકૃત્યા તે શોણચ્છવિરપિ ચ કામાક્ષિ ચરણો
મનીષાનૈર્મલ્યં કથમિવ નૃણાં માંસલયતે ॥ ૭૬॥

ચલત્તૃષ્ણાવીચીપરિચલનપર્યાકુલતયા
મુહુર્ભ્રાન્તસ્તાન્તઃ પરમશિવવામાક્ષિ પરવાન્ ।
તિતીર્ષુઃ કામાક્ષિ પ્રચુરતરકર્મામ્બુધિમમું
કદાહં લપ્સ્યે તે ચરણમણિસેતું ગિરિસુતે ॥ ૭૭॥

વિશુષ્યન્ત્યાં પ્રજ્ઞાસરિતિ દુરિતગ્રીષ્મસમય-
પ્રભાવેણ ક્ષીણે સતિ મમ મનઃકેકિનિ શુચા ।
ત્વદીયઃ કામાક્ષિ સ્ફુરિતચરણામ્ભોદમહિમા
નભોમાસાટોપં નગપતિસુતે કિં ન કુરુતે ॥ ૭૮॥

વિનમ્રાણાં ચેતોભવનવલભીસીમ્નિ ચરણ-
પ્રદીપે પ્રાકાશ્યં દધતિ તવ નિર્ધૂતતમસિ ।
અસીમા કામાક્ષિ સ્વયમલઘુદુષ્કર્મલહરી
વિઘૂર્ણન્તી શાન્તિં શલભપરિપાટીવ ભજતે ॥ ૭૯॥

વિરાજન્તી શુક્તિર્નખકિરણમુક્તામણિતતેઃ
વિપત્પાથોરાશૌ તરિરપિ નરાણાં પ્રણમતામ્ ।
ત્વદીયઃ કામાક્ષિ ધ્રુવમલઘુવહ્નિર્ભવવને
મુનીનાં જ્ઞાનાગ્નેરરણિરયમઙ્ઘ્રિર્વિજયતે ॥ ૮૦॥

સમસ્તૈઃ સંસેવ્યઃ સતતમપિ કામાક્ષિ વિબુધૈઃ
સ્તુતો ગન્ધર્વસ્ત્રીસુલલિતવિપઞ્ચીકલરવૈઃ ।
ભવત્યા ભિન્દાનો ભવગિરિકુલં જૃમ્ભિતતમો-
બલદ્રોહી માતશ્ચરણપુરુહૂતો વિજયતે ॥ ૮૧॥

વસન્તં ભક્તાનામપિ મનસિ નિત્યં પરિલસદ્-
ઘનચ્છાયાપૂર્ણં શુચિમપિ નૃણાં તાપશમનમ્ ।

નખેન્દુજ્યોત્સ્નાભિઃ શિશિરમપિ પદ્મોદયકરં
નમામઃ કામાક્ષ્યાશ્ચરણમધિકાશ્ચર્યકરણમ્ ॥ ૮૨॥

કવીન્દ્રાણાં નાનાભણિતિગુણચિત્રીકૃતવચઃ-
પ્રપઞ્ચવ્યાપારપ્રકટનકલાકૌશલનિધિઃ ।
અધઃકુર્વન્નબ્જં સનકભૃગુમુખ્યૈર્મુનિજનૈઃ
નમસ્યઃ કામાક્ષ્યાશ્ચરણપરમેષ્ઠી વિજયતે ॥ ૮૩॥

ભવત્યાઃ કામાક્ષિ સ્ફુરિતપદપઙ્કેરુહભુવાં
પરાગાણાં પૂરૈઃ પરિહૃતકલઙ્કવ્યતિકરૈઃ ।
નતાનામામૃષ્ટે હૃદયમુકુરે નિર્મલરુચિ
પ્રસન્ને નિશ્શેષં પ્રતિફલતિ વિશ્વં ગિરિસુતે ॥ ૮૪॥

તવ ત્રસ્તં પાદાત્કિસલયમરણ્યાન્તરમગાત્
પરં રેખારૂપં કમલમમુમેવાશ્રિતમભૂત્ ।
જિતાનાં કામાક્ષિ દ્વિતયમપિ યુક્તં પરિભવે
વિદેશે વાસો વા શરણગમનં વા નિજરિપોઃ ॥ ૮૫॥

ગૃહીત્વા યાથાર્થ્યં નિગમવચસાં દેશિકકૃપા-
કટાક્ષર્કજ્યોતિશ્શમિતમમતાબન્ધતમસઃ ।
યતન્તે કામાક્ષિ પ્રતિદિવસમન્તર્દ્રઢયિતું
ત્વદીયં પાદાબ્જં સુકૃતપરિપાકેન સુજનાઃ ॥ ૮૬॥

જડાનામપ્યમ્બ સ્મરણસમયે તવચ્ચરણયોઃ
ભ્રમન્મન્થક્ષ્માભૃદ્ઘુમુઘુમિતસિન્ધુપ્રતિભટાઃ ।
પ્રસન્નાઃ કામાક્ષિ પ્રસભમધરસ્પન્દનકરા
ભવન્તિ સ્વચ્છન્દં પ્રકૃતિપરિપક્કા ભણિતયઃ ॥ ૮૭॥

વહન્નપ્યશ્રાન્તં મધુરનિનદં હંસકમસૌ
તમેવાધઃ કર્તું કિમિવ યતતે કેલિગમને ।
ભવસ્યૈવાનન્દં વિદધદપિ કામાક્ષિ ચરણો
ભવત્યાસ્તદ્દ્રોહં ભગવતિ કિમેવં વિતનુતે ॥ ૮૮॥

યદત્યન્તં તામ્યત્યલસગતિવાર્તાસ્વપિ શિવે
તદેતત્કામાક્ષિ પ્રકૃતિમૃદુલં તે પદયુગમ્ ।
કિરીટૈઃ સંઘટ્ટં કથમિવ સુરૌઘસ્ય સહતે
મુનીન્દ્રાણામાસ્તે મનસિ ચ કથં સૂચિનિશિતે ॥ ૮૯॥

મનોરઙ્ગે મત્કે વિબુધજનસંમોદજનની
સરાગવ્યાસઙ્ગં સરસમૃદુસંચારસુભગા ।
મનોજ્ઞા કામાક્ષિ પ્રકટયતુ લાસ્યપ્રકરણં
રણન્મઞ્જીરા તે ચરણયુગલીનર્તકવધૂઃ ॥ ૯૦॥

પરિષ્કુર્વન્માતઃ પશુપતિકપર્દં ચરણરાટ્
પરાચાં હૃત્પદ્મં પરમભણિતીનાં ચ મકુટમ્ ।
ભવાખ્યે પાથોધૌ પરિહરતુ કામાક્ષિ મમતા-
પરાધીનત્વં મે પરિમુષિતપાથોજમહિમા ॥ ૯૧॥

પ્રસૂનૈઃ સમ્પર્કાદમરતરુણીકુન્તલભવૈઃ
અભીષ્ટાનાં દાનાદનિશમપિ કામાક્ષિ નમતામ્ ।
સ્વસઙ્ગાત્કઙ્કેલિપ્રસવજનકત્વેન ચ શિવે
ત્રિધા ધત્તે વાર્તાં સુરભિરિતિ પાદો ગિરિસુતે ॥ ૯૨॥

મહામોહસ્તેનવ્યતિકરભયાત્પાલયતિ યો
વિનિક્ષિપ્તં સ્વસ્મિન્નિજજનમનોરત્નમનિશમ્ ।
સ રાગસ્યોદ્રેકાત્સતતમપિ કામાક્ષિ તરસા
કિમેવં પાદોઽસૌ કિસલયરુચિં ચોરયતિ તે ॥ ૯૩॥

સદા સ્વાદુંકારં વિષયલહરીશાલિકણિકાં
સમાસ્વાદ્ય શ્રાન્તં હૃદયશુકપોતં જનનિ મે ।
કૃપાજાલે ફાલેક્ષણમહિષિ કામાક્ષિ રભસાત્
ગૃહીત્વા રુન્ધીથારસ્તવ પદયુગીપઞ્જરપુટે ॥ ૯૪॥

ધુનાનં કામાક્ષિ સ્મરણલવમાત્રેણ જડિમ-
જ્વરપ્રૌઢિં ગૂઢસ્થિતિ નિગમનૈકુઞ્જકુહરે ।
અલભ્યં સર્વેષાં કતિચન લભન્તે સુકૃતિનઃ
ચિરાદન્વિષ્યન્તસ્તવ ચરણસિદ્ધૌષધમિદમ્ ॥ ૯૫॥

રણન્મઞ્જીરાભ્યાં લલિતગમનાભ્યાં સુકૃતિનાં
મનોવાસ્તવ્યાભ્યાં મથિતતિમિરાભ્યાં નખરુચા ।
નિધેયાભ્યાં પત્યા નિજશિરસિ કામાક્ષિ સતતં
નમસ્તે પાદાભ્યાં નલિનમૃદુલાભ્યાં ગિરિસુતે ॥ ૯૬॥

સુરાગે રાકેન્દુપ્રતિનિધિમુખે પર્વતસુતે

ચિરાલ્લભ્યે ભક્ત્યા શમધનજનાનાં પરિષદા ।
મનોભૃઙ્ગો મત્કઃ પદકમલયુગ્મે જનનિ તે
પ્રકામં કામાક્ષિ ત્રિપુરહરવામાક્ષિ રમતામ્ ॥ ૯૭॥

શિવે સંવિદ્રૂપે શશિશકલચૂડપ્રિયતમે
શનૈર્ગત્યાગત્યા જિતસુરવરેભે ગિરિસુતે ।
યતન્તે સન્તસ્તે ચરણનલિનાલાનયુગલે
સદા બદ્ધં ચિત્તપ્રમદકરિયૂથં દૃઢતરમ્ ॥ ૯૮॥

યશઃ સૂતે માતર્મધુરકવિતાં પક્ષ્મલયતે
શ્રિયં દત્તે ચિત્તે કમપિ પરિપાકં પ્રથયતે ।
સતાં પાશગ્રન્થિં શિથિલયતિ કિં કિં ન કુરુતે
પ્રપન્ને કામાક્ષ્યાઃ પ્રણતિપરિપાટી ચરણયોઃ ॥ ૯૯॥

મનીષાં માહેન્દ્રીં કકુભમિવ તે કામપિ દશાં
પ્રધત્તે કામાક્ષ્યાશ્ચરણતરુણાદિત્યકિરણઃ ।
યદીયે સમ્પર્કે ધૃતરસમરન્દા કવયતાં
પરીપાકં ધત્તે પરિમલવતી સૂક્તિનલિની ॥ ૧૦૦॥

પુરા મારારાતિઃ પુરમજયદમ્બ સ્તવશતૈઃ
પ્રસન્નાયાં સત્યાં ત્વયિ તુહિનશૈલેન્દ્રતનયે ।
અતસ્તે કામાક્ષિ સ્ફુરતુ તરસા કાલસમયે
સમાયાતે માતર્મમ મનસિ પાદાબ્જયુગલમ્ ॥ ૧૦૧॥

પદદ્વન્દ્વં મન્દં ગતિષુ નિવસન્તં હૃદિ સતાં
ગિરામન્તે ભ્રાન્તં કૃતકરહિતાનાં પરિબૃઢે ।
જનાનામાનન્દં જનનિ જનયન્તં પ્રણમતાં
ત્વદીયં કામાક્ષિ પ્રતિદિનમહં નૌમિ વિમલમ્ ॥ ૧૦૨॥

ઇદં યઃ કામાક્ષ્યાશ્ચરણનલિનસ્તોત્રશતકં
જપેન્નિત્યં ભક્ત્યા નિખિલજગદાહ્લાદજનકમ્ ।
સ વિશ્વેષાં વન્દ્યઃ સકલકવિલોકૈકતિલકઃ
ચિરં ભુક્ત્વા ભોગાન્પરિણમતિ ચિદ્રૂપકલયા ॥ ૧૦૩॥

પાદારવિન્દશતકં સમ્પૂર્ણમ્ ॥

## ॥ સ્તુતિશતકમ્ ॥

પાણ્ડિત્યં પરમેશ્વરિ સ્તુતિવિધૌ નૈવાશ્રયન્તે ગિરાં
વૈરિઞ્ચાન્યપિ ગુમ્ફનાનિ વિગલદ્ગર્વાણિ શર્વાણિ તે ।
સ્તોતું ત્વાં પરિફુલ્લનીલનલિનશ્યામાક્ષિ કામાક્ષિ માં
વાચાલીકુરુતે તથાપિ નિતરાં ત્વત્પાદસેવાદરઃ ॥ ૧॥

તાપિઞ્છસ્તબકત્વિષે તનુભૃતાં દારિદ્ર્યમુદ્રાદ્વિષે
સંસારાખ્યતમોમુષે પુરરિપોર્વામાઙ્કસીમાજુષે ।
કમ્પાતીરમુપેયુષે કવયતાં જિહ્વાકુટીં જગ્મુષે
વિશ્વત્રાણપુષે નમોઽસ્તુ સતતં તસ્મૈ પરંજ્યોતિષે ॥ ૨॥

યે સન્ધ્યારુણયન્તિ શંકરજટાકાન્તારચન્દ્રાર્ભકં
સિન્દૂરન્તિ ચ યે પુરન્દરવધૂસીમન્તસીમાન્તરે ।
પુણ્યં યે પરિપક્વયન્તિ ભજતાં કાઞ્ચીપુરે મામમી
પાયાસુઃ પરમેશ્વરપ્રણયિનીપાદોદ્ભવાઃ પાંસવઃ ॥ ૩॥

કામાડમ્બરપૂરયા શશિરુચા કમ્રસ્મિતાનાં ત્વિષા
કામારેરનુરાગસિન્ધુમધિકં કલ્લોલિતં તન્વતી ।
કામાક્ષીતિ સમસ્તસજ્જનનુતા કલ્યાણદાત્રી નૃણાં
કારુણ્યાકુલમાનસા ભગવતી કમ્પાતટે જૃમ્ભતે ॥ ૪॥

કામાક્ષીણપરાક્રમપ્રકટનં સમ્ભાવયન્તી દૃશા
શ્યામા ક્ષીરસહોદરસ્મિતરુચિપ્રક્ષાલિતાશાન્તરા ।
કામાક્ષીજનમૌલિભૂષણમણિર્વાચાં પરા દેવતા
કામાક્ષીતિ વિભાતિ કાપિ કરુણા કમ્પાતટિન્યાસ્તટે ॥ ૫॥

શ્યામા કાચન ચન્દ્રિકા ત્રિભુવને પુણ્યાત્મનામાનને
સીમાશૂન્યકવિત્વવર્ષજનની યા કાપિ કાદમ્બિની ।
મારારાતિમનોવિમોહનવિધૌ કાચિત્તમઃકન્દલી
કામાક્ષ્યાઃ કરુણાકટાક્ષલહરી કામાય મે કલ્પતામ્ ॥ ૬॥

પ્રૌઢધ્વાન્તકદમ્બકે કુમુદિનીપુણ્યાંકુરં દર્શયન્

જ્યોત્સ્નાસંગમનેઽપિ કોકમિથુનં મિશ્રં સમુદ્ભાવયન્ ।
કાલિન્દીલહરીદશાં પ્રકટયન્કમ્રાં નભસ્યદ્ભુતાં
કશ્ચિન્નેત્રમહોત્સવો વિજયતે કાઞ્ચીપુરે શૂલિનઃ ॥ ૭॥

તન્દ્રાહીનતમાલનીલસુષમૈસ્તારુણ્યલીલાગૃહૈઃ
તારાનાથકિશોરલાઞ્છિતકચૈસ્તામ્રારવિન્દેક્ષણૈઃ ।
માતઃ સંશ્રયતાં મનો મનસિજપ્રાગલ્ભ્યનાડિન્ધમૈઃ
કમ્પાતીરચરૈર્ઘનસ્તનભરૈઃ પુણ્યાઙ્કુરૈઃ શાંકરૈઃ ॥ ૮॥

નિત્યં નિશ્ચલતામુપેત્ય મરુતાં રક્ષાવિધિં પુષ્ણતી
તેજસ્સંચયપાટવેન કિરણાનુષ્ણદ્યુતેર્મુષ્ણતી ।
કાઞ્ચીમધ્યગતાપિ દીપ્તિજનની વિશ્વાન્તરે જૃમ્ભતે
કાચિચ્ચિત્રમહો સ્મૃતાપિ તમસાં નિર્વાપિકા દીપિકા ॥ ૯॥

કાન્તૈઃ કેશરુચાં ચયૈર્ભ્રમરિતં મન્દસ્મિતૈઃ પુષ્પિતં
કાન્ત્યા પલ્લવિતં પદામ્બુરુહયોર્નેત્રત્વિષા પત્રિતમ્ ।
કમ્પાતીરવનાન્તરં વિદધતી કલ્યાણજન્મસ્થલી
કાઞ્ચીમધ્યમહામણિર્વિજયતે કાચિત્કૃપાકન્દલી ॥ ૧૦॥

રાકાચન્દ્રસમાનકાન્તિવદના નાકાધિરાજસ્તુતા
મૂકાનામપિ કુર્વતી સુરધુનીનીકાશવાગ્વૈભવમ્ ।
શ્રીકાઞ્ચીનગરીવિહારરસિકા શોકાપહન્ત્રી સતામ્
એકા પુણ્યપરમ્પરા પશુપતેરાકારિણી રાજતે ॥ ૧૧॥

જાતા શીતલશૈલતઃ સુકૃતિનાં દૃશ્યા પરં દેહિનાં
લોકાનાં ક્ષણમાત્રસંસ્મરણતઃ સન્તાપવિચ્છેદિની ।
આશ્ચર્યં બહુ ખેલનં વિતનુતે નૈશ્ચલ્યમાબિભ્રતી
કમ્પાયાસ્તટસીમ્નિ કાપિ તટિની કારુણ્યપાથોમયી ॥ ૧૨॥

ઐક્યં યેન વિરચ્યતે હરતનૌ દમ્ભાવપુમ્ભાવુકે
રેખા યત્કચસીમ્નિ શેખરદશાં નૈશાકરી ગાહતે ।
ઔન્નત્યં મુહુરેતિ યેન સ મહાન્મેનાસખઃ સાનુમાન્
કમ્પાતીરવિહારિણા સશરણાસ્તેનૈવ ધામ્ના વયમ્ ॥ ૧૩॥

અક્ષ્ણોશ્ચ સ્તનયોઃ શ્રિયા શ્રવણયોર્બાહ્વોશ્ચ મૂલં સ્પૃશન્
ઉત્તંસેન મુખેન ચ પ્રતિદિનં દ્રુહ્યન્પયોજન્મને ।
માધુર્યેણ ગિરાં ગતેન મૃદુના હંસાઙ્ગનાં હ્રેપયન્

કાઞ્ચીસીમ્નિ ચકાસ્તિ કોઽપિ કવિતાસન્તાનબીજાઙ્કુરઃ ॥ ૧૪॥

ખણ્ડં ચાન્દ્રમસં વતંસમનિશં કાઞ્ચીપુરે ખેલનં
કાલાયશ્છવિતસ્કરીં તનુરુચિં કર્ણજપે લોચને ।
તારુણ્યોષ્મનખમ્પચં સ્તનભરં જઙ્ઘાસ્પૃશં કુન્તલં
ભાગ્યં દેશિકસંચિતં મમ કદા સમ્પાદયેદમ્બિકે ॥ ૧૫॥

તન્વાનં નિજકેલિસૌધસરણિં નૈસર્ગિકીણાં ગિરાં
કેદારં કવિમલ્લસૂક્તિલહરીસસ્યશ્રિયાં શાશ્વતમ્ ।
અંહોવઞ્ચનચુઞ્ચુ કિંચન ભજે કાઞ્ચીપુરીમણ્ડનં
પર્યાયચ્છવિ પાકશાસનમણેઃ પૌષ્પેષવં પૌરુષમ્ ॥ ૧૬॥

આલોકે મુખપઙ્કજે ચ દધતી સૌધાકરીં ચાતુરીં
ચૂડાલંક્રિયમાણપઙ્કજવનીવૈરાગમપ્રક્રિયા ।
મુગ્ધસ્મેરમુખી ઘનસ્તનતટીમૂર્ચ્છાલમધ્યાઞ્ચિતા
કાઞ્ચીસીમનિ કામિની વિજયતે કાચિજ્જગન્મોહિની ॥ ૧૭॥

યસ્મિન્નમ્બ ભવત્કટાક્ષરજની મન્દેઽપિ મન્દસ્મિત-
જ્યોત્સ્નાસંસ્નપિતા ભવત્યભિમુખી તં પ્રત્યહો દેહિનમ્ ।
દ્રક્ષામાક્ષિકમાધુરીમદભરવ્રીડાકરી વૈખરી
કામાક્ષિ સ્વયમાતનોત્યભિસૃતિં વામેક્ષણેવ ક્ષણમ્ ॥ ૧૮॥

કાલિન્દીજલકાન્તયઃ સ્મિતરુચિસ્વર્વાહિનીપાથસિ
પ્રૌઢધ્વાન્તરુચઃ સ્ફુટાધરમહોલૌહિત્યસન્ધ્યોદયે ।
મણિક્યોપલકુણ્ડલાંશુશિખિનિ વ્યામિશ્રધૂમશ્રિયઃ
કલ્યાણૈકભુવઃ કટાક્ષસુષમાઃ કામાક્ષિ રાજન્તિ તે ॥ ૧૯॥

કલકલરણત્કાઞ્ચી કાઞ્ચીવિભૂષણમાલિકા
કચભરલસચ્ચન્દ્રા ચન્દ્રાવતંસસધર્મિણી ।
કવિકુલગિરઃ શ્રાવંશ્રાવં મિલત્પુલકાંકુરા
વિરચિતશિરઃકમ્પા કમ્પાતટે પરિશોભતે ॥ ૨૦॥

સરસવચસાં વીચી નીચીભવન્મધુમાધુરી
ભરિતભુવના કીર્તિર્મૂર્તિર્મનોભવજિત્વરી ।
જનનિ મનસો યોગ્યં ભોગ્યં નૃણાં તવ જાયતે
કથમિવ વિના કાઞ્ચીભૂષે કટાક્ષતરઙ્ગિતમ્ ॥ ૨૧॥

ભ્રમરિતસરિત્કૂલો નીલોત્પલપ્રભયાઽઽભયા
નતજનતમઃખણ્ડી તુણ્ડીરસીમ્નિ વિજૃમ્ભતે ।
અચલતપસામેકઃ પાકઃ પ્રસૂનશરાસન-
પ્રતિભટમનોહારી નારીકુલૈકશિખામણિઃ ॥ ૨૨॥

મધુરવચસો મન્દસ્મેરા મતઙ્ગજગામિનઃ
તરુણિમજુષસ્તાપિચ્છાભાસ્તમઃપરિપન્થિનઃ ।
કુચભરનતાઃ કુર્યુર્ભદ્રં કુરઙ્ગવિલોચનાઃ
કલિતકરુણાઃ કાઞ્ચીભાજઃ કપાલિમહોત્સવાઃ ॥ ૨૩॥

કમલસુષમાક્ષ્યારોહે વિચક્ષણવીક્ષણાઃ
કુમુદસુકૃતક્રીડાચૂડાલકુન્તલબન્ધુરાઃ ।
રુચિરરુચિભિસ્તાપિચ્છશ્રીપ્રપઞ્ચનચુઞ્ચવઃ
પુરવિજયિનઃ કમ્પાતીરે સ્ફુરન્તિ મનોરથાઃ ॥ ૨૪॥

કલિતરતયઃ કાઞ્ચીલીલાવિધૌ કવિમણ્ડલી-
વચનલહરીવાસન્તીનાં વસન્તવિભૂતયઃ ।
કુશલવિધયે ભૂયાસુર્મે કુરઙ્ગવિલોચનાઃ
કુસુમવિશિખારાતેરક્ષ્ણાં કુતૂહલવિભ્રમાઃ ॥ ૨૫॥

કબલિતતમસ્કાણ્ડાસ્તુણ્ડીરમણ્ડલમણ્ડનાઃ
સરસિજવનીસન્તાનાનામરુન્તુદશેખરાઃ ।
નયનસરણેર્નેદીયંસઃ કદા નુ ભવન્તિ મે
તરુણજલદશ્યામાઃ શમ્ભોસ્તપઃફલવિભ્રમાઃ ॥ ૨૬॥

અચરમમિષું દીનં મીનધ્વજસ્ય મુખશ્રિયા
સરસિજભુવો યાનં મ્લાનં ગતેન ચ મઞ્જુના ।
ત્રિદશસદસામન્નં ખિન્નં ગિરા ચ વિતન્વતી
તિલકયતિ સા કમ્પાતીરં ત્રિલોચનસુન્દરી ॥ ૨૭॥

જનનિ ભુવને ચઙ્ક્રમ્યેઽહં કિયન્તમનેહસં
કુપુરુષકરભ્રષ્ટૈર્દુષ્ટૈર્ધનૈરુદરમ્ભરિઃ ।
તરુણકરુણે તન્દ્રાશૂન્યે તરઙ્ગય લોચને
નમતિ મયિ તે કિંચિત્કાઞ્ચીપુરીમણિદીપિકે ॥ ૨૮॥

મુનિજનમનઃપેટીરત્નં સ્ફુરત્કરુણાનટી-
વિહરણકલાગેહં કાઞ્ચીપુરીમણિભૂષણમ્ ।

જગતિ મહતો મોહવ્યાધેર્નૃણાં પરમૌષધં
પુરહરદૃશાં સાફલ્યં મે પુરઃ પરિજૃમ્ભતામ્ ॥ ૨૯॥

મુનિજનમોધામ્ને ધામ્ને વચોમયજાહ્નવી-
હિમગિરિતટપ્રાગ્ભારાયાક્ષરાય પરાત્મને ।
વિહરણજુષે કાઞ્ચીદેશે મહેશ્વરલોચન-
ત્રિતયસરસક્રીડાસૌધાઙ્ગણાય નમો નમઃ ॥ ૩૦॥

મરકતરુચાં પ્રત્યાદેશં મહેશ્વરચક્ષુષામ્
અમૃતલહરીપૂરં પારં ભવાખ્યપયોનિધેઃ ।
સુચરિતફલં કાઞ્ચીભાજો જનસ્ય પચેલિમં
હિમશિખરિણો વંશસ્યૈકં વતંસમુપાસ્મહે ॥ ૩૧॥

પ્રણમનદિનારમ્ભે કમ્પાનદીસખિ તાવકે
સરસકવિતોન્મેષઃ પૂષા સતાં સમુદઞ્ચિતઃ ।
પ્રતિભટમહાપ્રૌઢપ્રોદ્યત્કવિત્વકુમુદ્વતીં
નયતિ તરસા નિદ્રામુદ્રાં નગેશ્વરકન્યકે ॥ ૩૨॥

શમિતજડિમારમ્ભા કમ્પાતટીનિકટેચરી
નિહતદુરિતસ્તોમા સોમાર્ધમુદ્રિતકુન્તલા ।
ફલિતસુમનોવાઞ્છા પાઞ્ચાયુધી પરદેવતા
સફલયતુ મે નેત્રે ગોત્રેશ્વરપ્રિયનન્દિની ॥ ૩૩॥

મમ તુ ધિષણા પીડ્યા જાડ્યાતિરેક કથં ત્વયા
કુમુદસુષમામૈત્રીપાત્રીવતંસિતકુન્તલામ્ ।
જગતિ શમિતસ્તમ્ભાં કમ્પાનદીનિલયામસૌ
શ્રિયતિ હિ ગલત્તન્દ્રા ચન્દ્રાવતંસસધર્મિણીમ્ ॥ ૩૪॥

પરિમલપરીપાકોદ્રેકં પયોમુચિ કાઞ્ચને
શિખરિણિ પુનર્દ્વૈધીભાવં શશિન્યરુણાતપમ્ ।
અપિ ચ જનયન્કમ્બોર્લક્ષ્મીમનમ્બુનિ કોઽપ્યસૌ
કુસુમધનુષઃ કાઞ્ચીદેશે ચકાસ્તિ પરાક્રમઃ ॥ ૩૫॥

પુરદમયિતુર્વામોત્સઙ્ગસ્થલેન રસજ્ઞયા
સરસકવિતાભાજા કાઞ્ચીપુરોદરસીમયા ।
તટપરિસરૈર્નીહારાદ્રેર્વચોભિરકૃત્રિમૈઃ
કિમિવ ન તુલામસ્મચ્ચેતો મહેશ્વરિ ગાહતે ॥ ૩૬॥

નયનયુગલીમાસ્માકીનાં કદા નુ ફલેગ્રહીં
વિદધતિ ગતૌ વ્યાકુર્વાણા ગજેન્દ્રચમત્ક્રિયામ્ ।
મરતકરુચો માહેશાના ઘનસ્તનનમ્રિતાઃ
સુકૃતવિભવાઃ પ્રાઞ્ચઃ કાઞ્ચીવતંસધુરન્ધરાઃ ॥ ૩૭॥

મનસિજયશઃપારમ્પર્યં મરન્દઝરીસુવાં
કવિકુલગિરાં કન્દં કમ્પાનદીતટમણ્ડનમ્ ।
મધુરલલિતં મત્કં ચક્ષુર્મનીષિમનોહરં
પુરવિજયિનઃ સર્વસ્વં તત્પુરસ્કુરુતે કદા ॥ ૩૮॥

શિથિલિતતમોલીલાં નીલારવિન્દવિલોચનાં
દહનવિલસત્ફાલાં શ્રીકામકોટિમુપાસ્મહે ।
કરધૃતસચ્છૂલાં કાલારિચિત્તહરાં પરાં
મનસિજકૃપાલીલાં લોલાલકામલિકેક્ષણામ્ ॥ ૩૯॥

કલાલીલાશાલા કવિકુલવચઃકૈરવવની-
શરજ્જ્યોત્સ્નાધારા શશધરશિશુશ્લાઘ્યમુકુટી ।
પુનીતે નઃ કમ્પાપુલિનતટસૌહાર્દતરલા
કદા ચક્ષુર્માર્ગં કનકગિરિધાનુષ્કમહિષી ॥ ૪૦॥

નમઃ સ્તાન્નમ્રેભ્યઃ સ્તનગરિમગર્વેણ ગુરુણા
દધાનેભ્યશ્ચૂડાભરણમમૃતસ્યન્દિ શિશિરમ્ ।
સદા વાસ્તવેભ્યઃ સુવિધભુવિ કમ્પાખ્યસરિતે
યશોવ્યાપારેભ્યઃ સુકૃતવિભવેભ્યો રતિપતેઃ ॥ ૪૧॥

અસૂયન્તી કાચિન્મરકતરુચો નાકિમુકુટી-
કદમ્બં ચુમ્બન્તી ચરણનખચન્દ્રાંશુપટલૈઃ ।
તમોમુદ્રાં વિદ્રાવયતુ મમ કાઞ્ચીર્નિલયના
હરોત્સઙ્ગશ્રીમન્મણિગૃહમહાદીપકલિકા ॥ ૪૨॥

અનાદ્યન્તા કાચિત્સુજનનયનાનન્દજનની
નિરુન્ધાના કાન્તિં નિજરુચિવિલાસૈર્જલમુચામ્ ।
સ્મરારેસ્તારલ્યં મનસિ જનયન્તી સ્વયમહો
ગલત્કમ્પા શમ્પા પરિલસતિ કમ્પાપરિસરે ॥ ૪૩॥

સુધાડિણ્ડીરશ્રીઃ સ્મિતરુચિષુ તુણ્ડીરવિષયં

પરિષ્કુર્વાણાસૌ પરિહસિતનીલોત્પલરુચિઃ ।
સ્તનાભ્યામાનમ્રા સ્તબકયતુ મે કાઙ્ક્ષિતતરું
દૃશામૈશાનીનાં સુકૃતફલપાણ્ડિત્યગરિમા ॥ ૪૪॥

કૃપાધારાદ્રોણી કૃપણધિષણાનાં પ્રણમતાં
નિહન્ત્રી સન્તાપં નિગમમુકુટોત્તંસકલિકા ।
પરા કાઞ્ચીલીલાપરિચયવતી પર્વતસુતા
ગિરાં નીવી દેવી ગિરિશપરતન્ત્રા વિજયતે ॥ ૪૫॥

કવિત્વશ્રીકન્દઃ સુકૃતપરિપાટી હિમગિરેઃ
વિધાત્રી વિશ્વેષાં વિષમશરવીરધ્વજપટી ।
સખી કમ્પાનદ્યાઃ પદહસિતપાથોજયુગલી
પુરાણો પાયાન્નઃ પુરમથનસામ્રાજ્યપદવી ॥ ૪૬॥

દરિદ્રાણા મધ્યે દરદલિતતાપિચ્છસુષમાઃ
સ્તનાભોગક્લાન્તાસ્તરુણહરિણાઙ્કાઙ્કિતકચાઃ ।
હરાધીના નાનાવિબુધમુકુટીચુમ્બિતપદાઃ
કદા કમ્પાતીરે કથય વિહરામો ગિરિસુતે ॥ ૪૭॥

વરીવર્તુ સ્થેમા ત્વયિ મમ ગિરાં દેવિ મનસો
નરીનર્તુ પ્રૌઢા વદનકમલે વાક્યલહરી ।
ચરીચર્તુ પ્રજ્ઞાજનનિ જડિમાનઃ પરજને
સરીસર્તુ સ્વૈરં જનનિ મયિ કામાક્ષિ કરુણા ॥ ૪૮॥

ક્ષણાત્તે કામાક્ષિ ભ્રમરસુષમાશિક્ષણગુરુઃ
કટાક્ષવ્યાક્ષેપો મમ ભવતુ મોક્ષાય વિપદામ્ ।
નરીનર્તુ સ્વૈરં વચનલહરી નિર્જરપુરી-
સરિદ્વીચીનીચીકરણપટુરાસ્યે મમ સદા ॥ ૪૯॥

પુરસ્તાન્મે ભૂયઃપ્રશમનપરઃ સ્તાન્મમ રુજાં
પ્રચારસ્તે કમ્પાતટવિહૃતિસમ્પાદિનિ દૃશોઃ ।
ઇમાં યાચ્ઞામૂરીકુરુ સપદિ દૂરીકુરુ તમઃ-
પરીપાકં મત્કં સપદિ બુધલોકં ચ નય મામ્ ॥ ૫૦॥

ઉદઞ્ચન્તી કાઞ્ચીનગરનિલયે ત્વત્કરુણયા
સમૃદ્ધા વાગ્ધાટી પરિહસિતમાધ્વી કવયતામ્ ।
ઉપાદત્તે મારપ્રતિભટજટાજૂટમુકુટી-

કુટીરોલ્લાસિન્યાઃ શતમખતટિન્યા જયપટીમ્ ॥ ૫૧॥

શ્રિયં વિદ્યાં દદ્યાજ્જનનિ નમતાં કીર્તિમમિતાં
સુપુત્રાન્ પ્રાદત્તે તવ ઝટિતિ કામાક્ષિ કરુણા ।
ત્રિલોક્યામાધિક્યં ત્રિપુરપરિપન્થિપ્રણયિનિ
પ્રણામસ્ત્વત્પાદે શમિતદુરિતે કિં ન કુરુતે ॥ ૫૨॥

મનઃસ્તમ્ભં સ્તમ્ભં ગમયદુપકમ્પં પ્રણમતાં
સદા લોલં નીલં ચિકુરજિતલોલમ્બનિકરમ્ ।
ગિરાં દૂરં સ્મેરં ધૃતશશિકિશોરં પશુપતેઃ
દૃશાં યોગ્યં ભોગ્યં તુહિનગિરિભાગ્યં વિજયતે ॥ ૫૩॥

ઘનશ્યામાન્કામાન્તકમહિષિ કામાક્ષિ મધુરાન્
દૃશાં પાતાનેતાનમૃતજલશીતાનનુપમાન્ ।
ભવોત્પાતે ભીતે મયિ વિતર નાથે દૃઢભવ-
ન્મનશ્શોકે મૂકે હિમગિરિપતાકે કરુણયા ॥ ૫૪॥

નતાનાં મન્દાનાં ભવનિગલબન્ધાકુલધિયાં
મહાન્ધ્યાં રુન્ધાનામભિલષિતસન્તાનલતિકામ્ ।
ચરન્તીં કમ્પાયાસ્તટભુવિ સવિત્રીં ત્રિજગતાં
સ્મરામસ્તાં નિત્યં સ્મરમથનજીવાતુકલિકામ્ ॥ ૫૫॥

પરા વિદ્યા હૃદ્યાશ્રિતમદનવિદ્યા મરકત-
પ્રભાનીલા લીલાપરવશિતશૂલાયુધમનાઃ ।
તમઃપૂરં દૂરં ચરણનતપૌરન્દરપુરી-
મૃગાક્ષી કામાક્ષી કમલતરલાક્ષી નયતુ મે ॥ ૫૬॥

અહન્તાખ્યા મત્કં કબલયતિ હા હન્ત હરિણી
હઠાત્સંવિદ્રૂપં હરમહિષિ સસ્યાઙ્કુરમસૌ ।
કટાક્ષવ્યાક્ષેપપ્રકટહરિપાષાણપટલૈઃ
ઇમામુચ્ચૈરુચ્ચાટય ઝટિતિ કામાક્ષિ કૃપયા ॥ ૫૭॥

બુધે વા મૂકે વા તવ પતતિ યસ્મિન્ક્ષણમસૌ
કટાક્ષઃ કામાક્ષિ પ્રકટજડિમક્ષોદપટિમા ।
કથંકારં નાસ્મૈ કરમુકુલચૂડાલમુકુટા
નમોવાકં બ્રૂયુર્નમુચિપરિપન્થિપ્રભૃતયઃ ॥ ૫૮॥

પ્રતીચીં પશ્યામઃ પ્રકટરુચિનીવારકમણિ-
પ્રભાસધ્રીચીનાં પ્રદલિતષડાધારકમલામ્ ।
ચરન્તીં સૌષુમ્ને પથિ પરપદેન્દુપ્રવિગલ-
ત્સુધાર્દ્રાં કામાક્ષીં પરિણતપરંજ્યોતિરુદયામ્ ॥ ૫૯ ॥

જમ્ભારાતિપ્રભૃતિમુકુટીઃ પાદયોઃ પીઠયન્તી
ગુમ્ફાન્વાચાં કવિજનકૃતાન્સ્વૈરમારામયન્તી ।
શમ્પાલક્ષ્મીં મણિગણરુચાપાટલૈઃ પ્રાપયન્તી
કમ્પાતીરે કવિપરિષદાં જૃમ્ભતે ભાગ્યસીમા ॥ ૬૦ ॥

ચન્દ્રાપીડાં ચતુરવદનાં ચઞ્ચલાપાઙ્ગલીલાં
કુન્દસ્મેરાં કુચભરનતાં કુન્તલોદ્ધૂતભૃઙ્ગામ્ ।
મારારાતેર્મદનશિખિનં માંસલં દીપયન્તીં
કામાક્ષીં તાં કવિકુલગિરાં કલ્પવલ્લીમુપાસે ॥ ૬૧ ॥

કાલામ્ભોદપ્રકરસુષમાં કાન્તિભિસ્તિર્જયન્તી
કલ્યાણાનામુદયસરણિઃ કલ્પવલ્લી કવીનામ્ ।
કન્દર્પારેઃ પ્રિયસહચરી કલ્મષાણાં નિહન્ત્રી
કાઞ્ચીદેશં તિલકયતિ સા કાપિ કારુણ્યસીમા ॥ ૬૨ ॥

ઊરીકુર્વન્નુરસિજતટે ચાતુરીં ભૂધરાણાં
પાથોજાનાં નયનયુગલે પરિપન્થ્યં વિતન્વન્ ।
કમ્પાતીરે વિહરતિ રુચા મોઘયન્મેઘશૈલીં
કોકદ્વેષં શિરસિ કલયન્કોઽપિ વિદ્યાવિશેષઃ ॥ ૬૩ ॥

કાઞ્ચીલીલાપરિચયવતી કાપિ તાપિચ્છલક્ષ્મીઃ
જાડ્યારણ્યે હુતવહશિખા જન્મભૂમિઃ કૃપાયાઃ ।
માકન્દશ્રીર્મધુરકવિતાચાતુરી કોકિલાનાં
માર્ગે ભૂયાન્મમ નયનયોર્માન્મથી કાપિ વિદ્યા ॥ ૬૪ ॥

સેતુર્માતર્મરતકમયો ભક્તિભાજાં ભવાબ્ધૌ
લીલાલોલા કુવલયમયી માન્મથી વૈજયન્તી ।
કાઞ્ચીભૂષા પશુપતિદૃશાં કાપિ કાલાઞ્જનાલી
મત્કં દુઃખં શિથિલયતુ તે મઞ્જુલાપાઙ્ગમાલા ॥ ૬૫ ॥

વ્યાવૃણ્વાનાઃ કુવલયદલપ્રક્રિયાવૈરમુદ્રાં
વ્યાકુર્વાણા મનસિજમહારાજસામ્રાજ્યલક્ષ્મીમ્ ।

કાઞ્ચીલીલાવિહૃતિરસિકે કાઙ્ક્ષિતં નઃ ક્રિયાસુઃ
બન્ધચ્છેદે તવ નિયમિનાં બદ્ધદીક્ષાઃ કટાક્ષાઃ ॥ ૬૬॥

કાલામ્ભોદે શશિરુચિ દલં કૈતકં દર્શયન્તી
મધ્યેસૌદામિનિ મધુલિહાં માલિકાં રાજયન્તી ।
હંસારાવં વિકચકમલે મઞ્જુમુલ્લાસયન્તી
કમ્પાતીરે વિલસતિ નવા કાપિ કારુણ્યલક્ષ્મીઃ ॥ ૬૭॥

ચિત્રં ચિત્રં નિજમૃદુતયા ભર્ત્સયન્પલ્લવાલીં
પુંસાં કામાન્ભુવિ ચ નિયતં પૂરયન્પુણ્યભાજામ્ ।
જાતઃ શૈલાન્ન તુ જલનિધેઃ સ્વૈરસંચારશીલઃ
કાઞ્ચીભૂષા કલયતુ શિવં કોऽપિ ચિન્તામણિર્મે ॥ ૬૮॥

તામ્રામ્ભોજં જલદનિકટે તત્ર બન્ધૂકપુષ્પં
તસ્મિન્મલ્લીકુસુમસુષમાં તત્ર વીણાનિનાદમ્ ।
વ્યાવૃન્વાના સુકૃતલહરી કાપિ કાઞ્ચિનગર્યામ્
ઐશાની સા કલયતિતરામૈન્દ્રજાલં વિલાસમ્ ॥ ૬૯॥

આહારાંશં ત્રિદશસદસામાશ્રયે ચાતકાનામ્
આકાશોપર્યપિ ચ કલયન્નાલયં તુઙ્ગમેષામ્ ।
કમ્પાતીરે વિહરતિતરાં કામધેનુઃ કવીનાં
મન્દસ્મેરો મદનનિગમપ્રક્રિયાસમ્પ્રદાયઃ ॥ ૭૦॥

આર્દ્રીભૂતૈરવિરલકૃપૈરાત્તલીલાવિલાસૈઃ
આસ્થાપૂર્ણૈરધિકચપલૈરઞ્ચિતામ્ભોજશિલ્પૈઃ ।
કાન્તૈર્લક્ષ્મીલલિતભવનૈઃ કાન્તિકૈવલ્યસારૈઃ
કાશ્મલ્યં નઃ કબલયતુ સા કામકોટી કટાક્ષૈઃ ॥ ૭૧॥

આધૂન્વન્ત્યૈ તરલનયનૈરાઙ્ગજીં વૈજયન્તીમ્
આનન્દિન્યૈ નિજપદજુષામાત્તકાઞ્ચીપુરાયૈ ।
આસ્માકીનં હૃદયમખિલૈરાગમાનાં પ્રપઞ્ચૈઃ
આરાધ્યાયૈ સ્પૃહયતિતરામદિમાયૈ જનન્યૈ ॥ ૭૨॥

દૂરં વાચાં ત્રિદશસદસાં દુઃખસિન્ધોસ્તરિત્રં
મોહક્ષ્વેલક્ષિતિરુહવને ક્રૂરધારં કુઠારમ્ ।
કમ્પાતીરપ્રણયિ કવિભિર્વર્ણિતોદ્યચ્ચરિત્રં
શાન્ત્યૈ સેવે સકલવિપદાં શાંકરં તત્કલત્રમ્ ॥ ૭૩॥

ખણ્ડીકૃત્ય પ્રકૃતિકુટિલં કલ્મષં પ્રાતિભશ્રી-
શુણ્ડીરત્વં નિજપદજુષાં શૂન્યતન્દ્રં દિશન્તી ।
તુણ્ડીરાખ્યૈ મહતિ વિષયે સ્વર્ણવૃષ્ટિપ્રદાત્રી
ચણ્ડી દેવી કલયતિ રતિં ચન્દ્રચૂડાલચૂડે ॥ ૭૪॥

યેન ખ્યાતો ભવતિ સ ગૃહી પૂરુષો મેરુધન્વા
યદ્દૃક્કોણે મદનનિગમપ્રાભવં બોભવીતિ ।
યત્પ્રીત્યૈવ ત્રિજગદધિપો જૃમ્ભતે કિમ્પચાનઃ
કમ્પાતીરે સ જયતિ મહાન્કશ્ચિદોજોવિશેષઃ ॥ ૭૫॥

ધન્યા ધન્યા ગતિરિહ ગિરાં દેવિ કામાક્ષિ યન્મે
નિન્દ્યાં ભિન્દ્યાત્સપદિ જડતાં કલ્મષાદુન્મિષન્તીમ્ ।
સાધ્વી માધ્વીરસમધુરતાભઞ્જિની મઞ્જુરીતિઃ
વાણીવેણી ઝટિતિ વૃણુતાત્સ્વર્ધુનીસ્પર્ધિની મામ્ ॥ ૭૬॥

યસ્યા વાટી હૃદયકમલં કૌસુમી યોગભાજાં
યસ્યાઃ પીઠી સતતશિશિરા શીકરૈર્માકરન્દૈઃ ।
યસ્યાઃ પેટી શ્રુતિપરિચલન્મૌલિરત્નસ્ય કાઞ્ચી
સા મે સોમાભરણમહિષી સાધયેત્કાઙ્ક્ષિતાનિ ॥ ૭૭॥

એકા માતા સકલજગતામીયુષી ધ્યાનમુદ્રામ્
એકામ્રાધીશ્વરચરણયોરેકતાનાં સમિન્ધે ।
તાટઙ્કોદ્યન્મણિગણરુચા તામ્રકર્ણપ્રદેશા
તારુણ્યશ્રીસ્તબકિતતનુસ્તાપસી કાપિ બાલા ॥ ૭૮॥

દન્તાદન્તિપ્રકટનકરી દન્તિભિર્મન્દયાનૈઃ
મન્દારાણાં મદપરિણતિં મથ્નતી મન્દહાસૈઃ ।
અઙ્કૂરાભ્યાં મનસિજતરોરઙ્કિતોરાઃ કુચાભ્યા-
મન્તઃકાઞ્ચિ સ્ફુરતિ જગતામાદિમા કાપિ માતા ॥ ૭૯॥

ત્રિયમ્બકકુટુમ્બિનીં ત્રિપુરસુન્દરીમિન્દિરાં
પુલિન્દપતિસુન્દરીં ત્રિપુરભૈરવીં ભારતીમ્ ।
મતઙ્ગકુલનાયિકાં મહિષમર્દનીં માતૃકાં
ભણન્તિ વિબુધોત્તમા વિહૃતિમેવ કામાક્ષિ તે ॥ ૮૦॥

મહામુનિમનોનટી મહિતરમ્યકમ્પાતટી-

કુટીરકવિહારિણી કુટિલબોધસંહારિણી ।
સદા ભવતુ કામિની સકલદેહિનાં સ્વામિની
કૃપાતિશયકિંકરી મમ વિભૂતયે શાંકરી ॥ ૮૧॥

જડાઃ પ્રકૃતિનિર્ધના જનવિલોચનારુન્તુદા
નરા જનનિ વીક્ષણં ક્ષણમવાપ્ય કામાક્ષિ તે ।
વચસ્સુ મધુમાધુરીં પ્રકટયન્તિ પૌરન્દરી-
વિભૂતિષુ વિડમ્બનાં વપુષિ માન્મથીં પ્રક્રિયામ્ ॥ ૮૨॥

ઘનસ્તનતટસ્ફુટસ્ફુરિતકઞ્ચુલીચઞ્ચલી-
કૃતત્રિપુરશાસના સુજનશીલિતોપાસના ।
દૃશોઃ સરણિમશ્નુતે મમ કદા નુ કાઞ્ચીપુરે
પરા પરમયોગિનાં મનસિ ચિત્કુલા પુષ્કલા ॥ ૮૩॥

કવીન્દ્રહૃદયેચરી પરિગૃહીતકાઞ્ચીપુરી
નિરૂઢકરુણાઝરી નિખિલલોકરક્ષાકરી ।
મનઃપથદવીયસી મદનશાસનપ્રેયસી
મહાગુણગરીયસી મમ દૃશોઽસ્તુ નેદીયસી ॥ ૮૪॥

ધનેન ન રમામહે ખલજનાન્ન સેવામહે
ન ચાપલમયામહે ભવભયાન્ન દૂયામહે ।
સ્થિરાં તનુમહેતરાં મનસિ કિં ચ કાઞ્ચીરત-
સ્મરાન્તકકુટુમ્બિનીચરણપલ્લવોપાસનામ્ ॥ ૮૫॥

સુરાઃ પરિજના વપુર્મનસિજાય વૈરાયતે
ત્રિવિષ્ટપનિતમ્બિનીકુચતટી ચ કેલીગિરિઃ ।
ગિરઃ સુરભયો વયસ્તરુણિમા દરિદ્રસ્ય વા
કટાક્ષસરણૌ ક્ષણં નિપતિતસ્ય કામાક્ષિ તે ॥ ૮૬॥

પવિત્રય જગત્ત્રયીવિબુધબોધજીવાતુભિઃ
પુરત્રયવિમર્દિનઃ પુલકકઞ્ચુલીદાયિભિઃ ।
ભવક્ષયવિચક્ષણૈર્વ્યસનમોક્ષણૈર્વીક્ષણૈઃ
નિરક્ષરશિરોમણિં કરુણયૈવ કામાક્ષિ મામ્ ॥ ૮૭॥

કદા કલિતખેલનાઃ કરુણયૈવ કાઞ્ચીપુરે
કલાયમુકુલત્વિષઃ શુભકદમ્બપૂર્ણાઙ્કુરાઃ ।
પયોધરભરાલસાઃ કવિજનેષુ તે બન્ધુરાઃ

પચેલિમકૃપારસા પરિપતન્તિ માર્ગે દૃશોઃ ॥ ૮૮॥

અશોધ્યમચલોદ્ભવં હૃદયનન્દનં દેહિનામ્
અનર્ઘમધિકાઞ્ચિ તત્કિમપિ રત્નમુદ્યોતતે ।
અનેન સમલંકૃતા જયતિ શઙ્કરાઙ્કસ્થલી
કદાસ્ય મમ માનસં વ્રજતિ પેટિકાવિભ્રમમ્ ॥ ૮૯॥

પરામૃતઝરીપ્લુતા જયતિ નિત્યમન્તશ્ચરી
ભુવામપિ બહિશ્ચરી પરમસંવિદેકાત્મિકા ।
મહદ્ભિરપરોક્ષિતા સતતમેવ કાઞ્ચીપુરે
મમાન્વહમહંમતિર્મનસિ ભાતુ માહેશ્વરી ॥ ૯૦॥

તમોવિપિનધાવિનં સતતમેવ કાઞ્ચીપુરે
વિહારરસિકા પરા પરમસંવિદુર્વીરુહે ।
કટાક્ષનિગલૈર્દૃઢં હૃદયદુષ્ટદન્તાવલં
ચિરં નયતુ મામકં ત્રિપુરવૈરિસીમન્તિની ॥ ૯૧॥

ત્વમેવ સતિ ચણ્ડિકા ત્વમસિ દેવિ ચામુણ્ડિકા
ત્વમેવ પરમાતૃકા ત્વમપિ યોગિનીરૂપિણી ।
ત્વમેવ કિલ શામ્ભવી ત્વમસિ કામકોટી જયા
ત્વમેવ વિજયા ત્વયિ ત્રિજગદમ્બ કિં બ્રૂમહે ॥ ૯૨॥

પરે જનનિ પાર્વતિ પ્રણતપાલિનિ પ્રાતિભ-
પ્રદાત્રિ પરમેશ્વરિ ત્રિજગદાશ્રિતે શાશ્વતે ।
ત્રિયમ્બકકુટુમ્બિનિ ત્રિપદસઙ્ગિનિ ત્રીક્ષણે
ત્રિશક્તિમયિ વીક્ષણં મયિ નિધેહિ કામાક્ષિ તે ॥ ૯૩॥

મનોમધુકરોત્સવં વિદધતી મનીષાજુષાં
સ્વયમ્પ્રભવવૈખરીવિપિનવીથિકાલમ્બિની ।
અહો શિશિરિતા કૃપામધુરસેન કમ્પાતટે
ચરાચરવિધાયિની ચલતિ કાપિ ચિન્મઞ્જરી ॥ ૯૪॥

કલાવતિ કલાભૃતો મુકુટસીમ્નિ લીલાવતિ
સ્પૃહાવતિ મહેશ્વરે ભુવનમોહને ભાસ્વતિ ।
પ્રભાવતિ રમે સદા મહિતરૂપશોભાવતિ
ત્વરાવતિ પરે સતાં ગુરુકૃપામ્બુધારાવતિ ॥ ૯૫॥

ત્વયૈવ જગદમ્બયા ભુવનમણ્ડલં સૂયતે
ત્વયૈવ કરુણાર્દ્રયા તદપિ રક્ષણં નીયતે ।
ત્વયૈવ ખરકોપયા નયનપાવકે હૂયતે
ત્વયૈવ કિલ નિત્યયા જગતિ સન્તતં સ્થીયતે ॥ ૯૬॥

ચરાચરજગન્મયીં સકલહૃન્મયીં ચિન્મયીં
ગુણત્રયમયીં જગત્ત્રયમયીં ત્રિધામામયીમ્ ।
પરાપરમયીં સદા દશદિશાં નિશાહર્મયીં
પરાં સતતસન્મયીં મનસિ ચિન્મયીં શીલયે ॥ ૯૭॥

જય જગદમ્બિકે હરકુટુમ્બિનિ વક્ત્રરુચા
જિતશરદમ્બુજે ઘનવિડમ્બિનિ કેશરુચા ।
પરમવલમ્બનં કુરુ સદા પરરૂપધરે
મમ ગતસંવિદો જડિમડમ્બરતાણ્ડવિનઃ ॥ ૯૮॥

ભુવનજનનિ ભૂષાભૂતચન્દ્રે નમસ્તે
કલુષશમનિ કમ્પાતીરગેહે નમસ્તે ।
નિખિલનિગમવેદ્યે નિત્યરૂપે નમસ્તે
પરશિવમયિ પાશચ્છેદહસ્તે નમસ્તે ॥ ૯૯॥

ક્વણત્કાઞ્ચી કાઞ્ચીપુરમણિવિપઞ્ચીલયઝરી-
શિરઃકમ્પા કમ્પાવસતિરનુકમ્પાજલનિધિઃ ।
ઘનશ્યામા શ્યામા કઠિનકુચસીમા મનસિ મે
મૃગાક્ષી કામાક્ષી હરનટનસાક્ષી વિહરતાત્ ॥ ૧૦૦॥

સમરવિજયકોટી સાધકાનન્દધાટી
મૃદુગુણપરિપેટી મુખ્યકાદમ્બવાટી ।
મુનિનુતપરિપાટી મોહિતાજાણ્ડકોટી
પરમશિવવધૂટી પાતુ માં કામકોટી ॥ ૧૦૧॥

ઇમં પરવરપ્રદં પ્રકૃતિપેશલં પાવનં
પરાપરચિદાકૃતિપ્રકટનપ્રદીપાયિતમ્ ।
સ્તવં પઠતિ નિત્યદા મનસિ ભાવયન્નમ્બિકાં
જપૈરલમલં મખૈરધિકદેહસંશોષણૈઃ ॥ ૧૦૨॥

સ્તુતિશતકં સમ્પૂર્ણમ્ ॥

## ॥ કટાક્ષશતકમ્ ॥

મોહાન્ધકારનિવહં વિનિહન્તુમીડે
મૂકાત્મનામપિ મહાકવિતાવદાન્યાન્ ।
શ્રીકાઞ્ચિદેશશિશિરીકૃતિજાગરૂકાન્
એકામ્રનાથતરુણીકરુણાવલોકાન્ ॥ ૧॥

માતર્જયન્તિ મમતાગ્રહમોક્ષણાનિ
માહેન્દ્રનીલરુચિશિક્ષણદક્ષિણાનિ ।
કામાક્ષિ કલ્પિતજગત્ત્રયરક્ષણાનિ
ત્વદ્વીક્ષણાનિ વરદાનવિચક્ષણાનિ ॥ ૨॥

આનઙ્ગતન્ત્રવિધિદર્શિતકૌશલાનામ્
આનન્દમન્દપરિઘૂર્ણિતમન્થરાણામ્ ।
તારલ્યમમ્બ તવ તાડિતકર્ણસીમ્નાં
કામાક્ષિ ખેલતિ કટાક્ષનિરીક્ષણાનામ્ ॥ ૩॥

કલ્લોલિતેન કરુણારસવેલ્લિતેન
કલ્માષિતેન કમનીયમૃદુસ્મિતેન ।
મામઞ્ચિતેન તવ કિંચન કુઞ્ચિતેન
કામાક્ષિ તેન શિશિરીકુરુ વીક્ષિતેન ॥ ૪॥

સાહાય્યકં ગતવતી મુહુરર્જનસ્ય
મન્દસ્મિતસ્ય પરિતોષિતભીમચેતાઃ ।
કામાક્ષિ પાણ્ડવચમૂરિવ તાવકીના
કર્ણાન્તિકં ચલતિ હન્ત કટાક્ષલક્ષ્મીઃ ॥ ૫॥

અસ્તં ક્ષણાન્નયતુ મે પરિતાપસૂર્યમ્
આનન્દચન્દ્રમસમાનયતાં પ્રકાશમ્ ।
કાલાન્ધકારસુષુમાં કલયન્દિગન્તે
કામાક્ષિ કોમલકટાક્ષનિશાગમસ્તે ॥ ૬॥

તાટાઙ્કમૌક્તિકરુચાઙ્કુરદન્તકાન્તિઃ
કારુણ્યહસ્તિપશિખામણિનાધિરૂઢઃ ।
ઉન્મૂલયત્વશુભપાદપમસ્મદીયં
કામાક્ષિ તાવકકટાક્ષમતઙ્ગજેતન્દ્રઃ ॥ ૭॥

છાયાભરણે જગતાં પરિતાપહારી
તાટઙ્કરત્નમણિતલ્લજપલ્લવશ્રીઃ ।
કારુણ્યનામ વિકિરન્મકરન્દજાલં
કામાક્ષિ રાજતિ કટાક્ષસુરદ્રુમસ્તે ॥ ૮॥

સૂર્યાશ્રયપ્રણયિની મણિકુણ્ડલાંશુ-
લૌહિત્યકોકનદકાનનમાનનીયા ।
યાન્તી તવ સ્મરહરાનનકાન્તિસિન્ધું
કામાક્ષિ રાજતિ કટાક્ષકલિન્દકન્યા ॥ ૯॥

પ્રાપ્નોતિ યં સુકૃતિનં તવ પક્ષપાતાત્
કામાક્ષિ વીક્ષણવિલાસકલાપુરન્ધ્રી ।
સદ્યસ્તમેવ કિલ મુક્તિવધૂર્વૃણીતે
તસ્માન્નિતાન્તમનયોરિદમૈકમત્યમ્ ॥ ૧૦॥

યાન્તી સદૈવ મરુતામનુકૂલભાવં
ભ્રૂવલ્લિશક્રધનુરુલ્લસિતા રસાર્દ્રા ।
કામાક્ષિ કૌતુકતરઙ્ગિતનીલકણ્ઠા
કાદમ્બિનીવ તવ ભાતિ કટાક્ષમાલા ॥ ૧૧॥

ગઙ્ગામ્ભસિ સ્મિતમયે તપનાત્મજેવ
ગઙ્ગાધરોરસિ નવોત્પલમાલિકેવ ।
વક્ત્રપ્રભાસરસિ શૈવલમણ્ડલીવ
કામાક્ષિ રાજતિ કટાક્ષરુચિચ્છટા તે ॥ ૧૨॥

સંસ્કારતઃ કિમપિ કન્દલિતાન્ રસજ્ઞ-
કેદારસીમ્નિ સુધિયામુપભોગયોગ્યાન્ ।
કલ્યાણસૂક્તિલહરીકલમાંકુરાન્નઃ
કામાક્ષિ પક્ષ્મલયતુ ત્વદપાઙ્ગમેઘઃ ॥ ૧૩॥

ચાઞ્ચલ્યમેવ નિયતં કલયન્પ્રકૃત્યા
માલિન્યભૂઃ શ્રુતિપથાક્રમજાગરૂકઃ ।

કૈવલ્યમેવ કિમુ કલ્પયતે નતાનાં
કામાક્ષિ ચિત્રમપિ તે કરુણાકટાક્ષઃ ॥ ૧૪॥

સંજીવને જનનિ ચૂતશિલીમુખસ્ય
સંમોહને શશિકિશોરકશેખરસ્ય ।
સંસ્તમ્ભને ચ મમતાગ્રહચેષ્ટિતસ્ય
કામાક્ષિ વીક્ષણકલા પરમૌષધં તે ॥ ૧૫॥

નીલોઽપિ રાગમધિકં જનયન્પુરારેઃ
લોલોઽપિ ભક્તિમધિકાં દૃઢયન્નરાણામ્ ।
વક્રોઽપિ દેવિ નમતાં સમતાં વિતન્વન્
કામાક્ષિ નૃત્યતુ મયિ ત્વદપાઙ્ગપાતઃ ॥ ૧૬॥

કામદ્રુહો હૃદયયન્ત્રણજાગરૂકા
કામાક્ષિ ચઞ્ચલદૃગઞ્ચલમેખલા તે ।
આશ્ચર્યમમ્બ ભજતાં ઝટિતિ સ્વકીય-
સમ્પર્ક એવ વિધુનોતિ સમસ્તબન્ધાન્ ॥ ૧૭॥

કુણ્ઠીકરોતુ વિપદં મમ કુઞ્ચિતભ્રૂ-
ચાપાઞ્ચિતઃ શ્રિતવિદેહભવાનુરાગઃ ।
રક્ષોપકારમનિશં જનયઞ્જગત્યાં
કામાક્ષિ રામ ઇવ તે કરુણાકટાક્ષઃ ॥ ૧૮॥

શ્રીકામકોટિ શિવલોચનશોષિતસ્ય
શૃઙ્ગારબીજવિભવસ્ય પુનઃપ્રરોહે ।
પ્રેમામ્ભસાર્દ્રમચિરાત્પ્રચુરેણ શઙ્કે
કેદારમમ્બ તવ કેવલદૃષ્ટિપાતમ્ ॥ ૧૯॥

માહાત્મ્યશેવધિરસૌ તવ દુર્વિલઙ્ઘ્ય-
સંસારવિન્ધ્યગિરિકુણ્ઠનકેલિચુઞ્ચુઃ ।
ધૈર્યામ્બુધિં પશુપતેશ્ચુલકીકરોતિ
કામાક્ષિ વીક્ષણવિજૃમ્ભણકુમ્ભજન્મા ॥ ૨૦॥

પીયૂષવર્ષવશિશિરા સ્ફુટદુત્પલશ્રી-
મૈત્રી નિસર્ગમધુરા કૃતતારકાપ્તિઃ ।
કામાક્ષિ સંશ્રિતવતી વપુરષ્ટમૂર્તેઃ
જ્યોત્સ્નાયતે ભગવતિ ત્વદપાઙ્ગમાલા ॥ ૨૧॥

અમ્બ સ્મરપ્રતિભટસ્ય વપુર્મનોજ્ઞમ્
અમ્ભોજકાનનમિવાઞ્ચિતકણ્ટકાભમ્ ।
ભૃઙ્ગીવ ચુમ્બતિ સદૈવ સપક્ષપાતા
કામાક્ષિ કોમલરુચિસ્ત્વદપાઙ્ગમાલા ॥ ૨૨॥

કેશપ્રભાપટલનીલવિતાનજાલે
કામાક્ષિ કુણ્ડલમણિચ્છવિદીપશોભે ।
શઙ્કે કટાક્ષરુચિરઙ્ગતલે કૃપાખ્યા
શૈલૂષિકા નટતિ શંકરવલ્લભે તે ॥ ૨૩॥

અત્યન્તશીતલમતન્દ્રયતુ ક્ષણાર્ધમ્
અસ્તોકવિભ્રમમનઙ્ગવિલાસકન્દમ્ ।
અલ્પસ્મિતાદૃતમપારકૃપાપ્રવાહમ્
અક્ષિપ્રરોહમચિરાન્મયિ કામકોટિ ॥ ૨૪॥

મન્દાક્ષરાગતરલીકૃતિપારતન્ત્ર્યાત્
કામાક્ષિ મન્થરતરાં ત્વદપાઙ્ગડોલામ્ ।
આરુહ્ય મન્દમતિકૌતુકશાલિ ચક્ષુઃ
આનન્દમેતિ મુહુરર્ધશશાઙ્કમૌલેઃ ॥ ૨૫॥

ત્રૈયમ્બકં ત્રિપુરસુન્દરિ હર્મ્યભૂમિ-
રઙ્ગં વિહારસરસી કરુણાપ્રવાહઃ ।
દાસાશ્ચ વાસવમુખાઃ પરિપાલનીયં
કામાક્ષિ વિશ્વમપિ વીક્ષણભૂભૃતસ્તે ॥ ૨૬॥

વાગીશ્વરી સહચરી નિયમેન લક્ષ્મીઃ
ભ્રૂવલ્લરીવશકરી ભુવનાનિ ગેહમ્ ।
રૂપં ત્રિલોકનયનામૃતમમ્બ તેષાં
કામાક્ષિ યેષુ તવ વીક્ષણપારતન્ત્રી ॥ ૨૭॥

માહેશ્વરં ઝટિતિ માનસમીનમમ્બ
કામાક્ષિ ધૈર્યજલધૌ નિતરાં નિમગ્નમ્ ।
જાલેન શ ૃઙ્ખલયતિ ત્વદપાઙ્ગનામ્ના
વિસ્તારિતેન વિષમાયુધદાશકોઽસૌ ॥ ૨૮॥

ઉન્મથ્ય બોધકમલાકારમમ્બ જાડ્ય-

સ્તમ્બેરમં મમ મનોવિપિને ભ્રમન્તમ્ ।
કુણ્ઠીકુરુષ્વ તરસા કુટિલાગ્રસીમ્ના
કામાક્ષિ તાવકકટાક્ષમહાઙ્કુશેન ॥ ૨૯॥

ઉદ્વેલ્લિતસ્તબકિતૈર્લલિતૈર્વિલાસૈઃ
ઉત્થાય દેવિ તવ ગાઢકટાક્ષકુઞ્જાત્ ।
દૂરં પલાયયતુ મોહમૃગીકુલં મે
કામાક્ષિ સ્તવરમનુગ્રહકેસરીન્દ્રઃ ॥ ૩૦॥

સ્નેહાદૃતાં વિદલિતોત્પલકન્તિચોરાં
જેતારમેવ જગદીશ્વરિ જેતુકામઃ ।
માનોદ્ધતો મકરકેતુરસૌ ધુનીતે
કામાક્ષિ તાવકકટાક્ષકૃપાણવલ્લીમ્ ॥ ૩૧॥

શ્રૌતીં વ્રજન્નપિ સદા સરણિં મુનીનાં
કામાક્ષિ સન્તતમપિ સ્મૃતિમાર્ગગામી ।
કૌટિલ્યમમ્બ કથમસ્થિરતાં ચ ધત્તે
ચૌર્યં ચ પઙ્કજરુચાં ત્વદપાઙ્ગપાતઃ ॥ ૩૨॥

નિત્યં શ્રેતુઃ પરિચિતૌ યતમાનમેવ
નીલોત્પલં નિજસમીપનિવાસલોલમ્ ।
પ્રીત્યૈવ પાઠયતિ વીક્ષણદેશિકેન્દ્રઃ
કામાક્ષી કિન્તુ તવ કાલિમસમ્પ્રદાયમ્ ॥ ૩૩॥

ભ્રાન્ત્વા મુહુઃ સ્તબકિતસ્મિતફેનરાશૌ
કામાક્ષિ વક્ત્રરુચિસંચયવારિરાશૌ ।
આનન્દતિ ત્રિપુરમર્દનનેત્રલક્ષ્મીઃ
આલમ્બ્ય દેવિ તવ મન્દમપાઙ્ગસેતુમ્ ॥ ૩૪॥

શ્યામા તવ ત્રિપુરસુન્દરિ લોચનશ્રીઃ
કામાક્ષિ કન્દલિતમેદુરતારકાન્તિઃ ।
જ્યોત્સ્નાવતી સ્મિતરુચાપિ કથં તનોતિ
સ્પર્ધામહો કુવલયૈશ્ચ તથા ચકોરૈઃ ॥ ૩૫॥

કાલાઞ્જનં ચ તવ દેવિ નિરીક્ષણં ચ
કામાક્ષિ સામ્યસરણિં સમુપૈતિ કાન્ત્યા ।
નિશ્શેષનેત્રસુલભં જગતીષુ પૂર્વ-

મન્યત્રિનેત્રસુલભં તુહિનાદ્રિકન્યે ॥ ૩૬॥

ધૂમાઙ્કુરો મકરકેતનપાવકસ્ય
કામાક્ષિ નેત્રરુચિનીલિમચાતુરી તે ।
અત્યન્તમદ્ભુતમિદં નયનત્રયસ્ય
હર્ષોદયં જનયતે હરુણાઙ્કુમૌલેઃ ॥૩૭॥

આરભ્ભલેશસમયે તવ વીક્ષણસ્સ
કામાક્ષિ મૂકમપિ વીક્ષણમાત્રનમ્રમ્ ।
સર્વજ્ઞતા સકલલોકસમક્ષમેવ
કીર્તિસ્વયંવરણમાલ્યવતી વૃણીતે ॥ ૩૮॥

કાલામ્બુવાહ ઉવ તે પરિતાપહારી
કામાક્ષિ પુષ્કરમધઃકુરુતે કટાખ઼્ષઃ ।
પૂર્વઃ પરં ક્ષણરુચા સમુપૈતિ મૈત્રી-
મન્યસ્તુ સ।તતરુચિં પ્રકટીકરોતિ ॥ ૩૯॥

સૂક્ષ્મેઽપિ દુર્ગમતરેઽપિ ગુરુપ્રસાદ-
સાહાય્યકેન વિચરન્નપવર્ગમાર્ગે ।
સંસારપઙ્કુનિચયે ન પતત્યમૂં તે
કામાક્ષિ ગાઢમવલમ્બ્ય કટાક્ષયષ્ટિમ્ ॥ ૪૦॥

કામાક્ષિ સન્તતમસૌ હરિનીલરત્ન-
સ્તમ્ભે કટાક્ષરુચિપુઞ્જમયે ભવત્યાઃ ।
બદ્ધોઽપિ ભક્તિનિગલૈર્મમ ચિત્તહસ્તી
સ્તમ્ભં ચ બન્ધમપિ મુઞ્ચતિ હન્ત ચિત્રમ્ ॥ ૪૧॥

કામાક્ષિ કાષ્ણર્યમપિ સન્તતમઞ્જનં ચ
બિભ્રન્નિસર્ગતરલોઽપિ ભવત્કટાક્ષઃ ।
વૈમલ્યમન્વહમનઞ્જનતા ચ ભૂયઃ
સ્થૈર્યં ચ ભક્તહૃદયાય કથં દદાતિ ॥ ૪૨॥

મન્દસ્મિતસ્તબકિતં મણિકુણ્ડલાંશુ-
સ્તોમપ્રવાલરુચિરં શિશિરીકૃતાશમ્ ।
કામાક્ષિ રાજતિ કટાક્ષરુચેઃ કદમ્બમ્
ઉદ્યાનમમ્બ કરુણાહરિણેક્ષણાયાઃ ॥ ૪૩॥

કામાક્ષિ તાવકકટાક્ષમહેન્દ્રનીલ-
સિંહાસનં શ્રિતવતો મકરધ્વજસ્ય ।
સામ્રાજ્યમઙ્ગલવિધૌ મુણિકુણ્ડલશ્રીઃ
નીરાજનોત્સવતરઙ્ગિતદીપમાલા ॥ ૪૪॥

માતઃ ક્ષણં સ્નપય માં તવ વીક્ષિતેન
મન્દાક્ષિતેન સુજનૈરપરોક્ષિતેન ।
કામાક્ષિ કર્મતિમિરોત્કરભાસ્કરેણ
શ્રેયસ્કરેણ મધુપદ્યુતિતસ્કરેણ ॥ ૪૫॥

પ્રેમાપગાપયસિ મજ્જનમારચય્ય
યુક્તઃ સ્મિતાંશુકૃતભસ્મવિલેપનેન ।
કામાક્ષિ કુણ્ડલમણિદ્યુતિભિર્જટાલઃ
શ્રીકણ્ઠમેવ ભજતે તવ દૃષ્ટિપાતઃ ॥ ૪૬॥

કૈવલ્યદાય કરુણારસકિંકરાય
કામાક્ષિ કન્દલિતવિભ્રમશંકરાય ।
આલોકનાય તવ ભક્તશિવંકરાય
માતર્નમોઽસ્તુ પરતન્ત્રિતશંકરાય ॥ ૪૭॥

સામ્રાજ્યમઙ્ગલવિધૌ મકરધ્વજસ્ય
લોલાલકાલિકૃતતોરણમાલ્યશોભે ।
કામેશ્વરિ પ્રચલદુત્પલવૈજયન્તી-
ચાતુર્યમેતિ તવ ચઞ્ચલદૃષ્ટિપાતઃ ॥ ૪૮॥

માર્ગેણ મઞ્જુકચકાન્તિતમોવૃતેન
મન્દાયમાનગમના મદનાતુરાસૌ ।
કામાક્ષિ દૃષ્ટિરયતે તવ શંકરાય
સંકેતભૂમિમચિરાદભિસારિકેવ ॥ ૪૯॥

વ્રીડનુવૃત્તિરમણીકૃતસાહચર્યા
શૈવાલિતાં ગલરુચા શશિશેખરસ્ય ।
કામાક્ષિ કાન્તિસરસીં ત્વદપાઙ્ગલક્ષ્મીઃ
મન્દં સમાશ્રયતિ મજ્જનખેલનાય ॥ ૫૦॥

કાષાયમંશુકમિવ પ્રકટં દધાનો
માણિક્યકુણ્ડલરુચિં મમતાવિરોધી ।

શ્રુત્યન્તસીમનિ રતઃ સુતરાં ચકાસ્તિ
કામાક્ષિ તાવકકટાક્ષયતીશ્વરોઽસૌ ॥ ૫૧॥

પાષાણ એવ હરિનીલમણિર્દિનેષુ
પ્રમ્લનતાં કુવલયં પ્રકટીકરોતિ ।
નૌમિત્તિકો જલદમેચકિમા તતસ્તે
કામાક્ષિ શૂન્યમુપમનમપાઙ્ગલક્ષ્મ્યાઃ ॥ ૫૨॥

શૃઙ્ગારવિભ્રમવતી સુતરાં સલજ્જા
નાસાગ્રમૌક્તિકરુચા કૃતમન્દહાસા ।
શ્યામા કટાક્ષસુષમા તવ યુક્તમેતત્
કામાક્ષિ ચુમ્બતિ દિગમ્બરવક્ત્રબિમ્બમ્ ॥ ૫૩॥

નીલોત્પલેન મધુપેન ચ દૃષ્ટિપાતઃ
કામાક્ષિ તુલ્ય ઇતિ તે કથમામનન્તિ ।
શૈત્યેન નિન્દયતિ યદન્વહમિન્દુપાદાન્
પાથોરુહેણ યદસૌ કલહાયતે ચ ॥ ૫૪॥

ઓષ્ઠપ્રભાપટલવિદ્રુમમુદ્રિતે તે
ભ્રૂવલ્લિવીચિસુભગે મુખકાન્તિસિન્ધૌ ।
કામાક્ષિ વારિભરપૂરણલમ્બમાન-
કાલામ્બુવાહસરણિં લભતે કટાક્ષઃ ॥ ૫૫॥

મન્દસ્મિતૈર્ધવલિતા મણિકુણ્ડલાંશુ-
સમ્પર્કલોહિતરુચિસ્ત્વદપાઙ્ગધારા ।
કામાક્ષિ મલ્લિકુસુમૈર્નવપલ્લવૈશ્ચ
નીલોત્પલૈશ્ચ રચિતેવ વિભાતિ માલા ॥ ૫૬॥

કામાક્ષિ શીતલકૃપારસનિર્ઝરામ્ભઃ-
સમ્પર્કપક્ષ્મલરુચિસ્ત્વદપાઙ્ગમાલા ।
ગોભિઃ સદા પુરરિપોરભિલષ્યમાણા
દૂર્વાકદમ્બકવિડમ્બનમાતનોતિ ॥ ૫૭॥

હૃત્પઙ્કજં મમ વિકાસયતુ પ્રમુષ્ણ-
ન્નુલ્લાસમુત્પલરુચેસ્તમસાં નિરોદ્ધા ।
દોષાનુષઙ્ગજડતાં જગતાં ધુનાનઃ
કામાક્ષિ વીક્ષણવિલાસદિનોદયસ્તે ॥ ૫૮॥

ચક્ષુર્વિમોહયતિ ચન્દ્રવિભૂષણસ્ય
કામાક્ષિ તાવકકટાક્ષતમઃપ્રરોહઃ ।
પ્રત્યઙ્મુખં તુ નયનં સ્તિમિતં મુનીનાં
પ્રાકાશ્યમેવ નયતીતિ પરં વિચિત્રમ્ ॥ ૫૯॥

કામાક્ષિ વીક્ષણરુચા યુધિ નિર્જિતં તે
નીલોત્પલં નિરવશેષગતાભિમાનમ્ ।
આગત્ય તત્પરિસરં શ્રવણવતંસ-
વ્યોજેન નૂનમભયાર્થનમાતનોતિ ॥ ૬૦॥

આશ્ચર્યમમ્બ મદનાભ્યુદયાવલમ્બઃ
કામાક્ષિ ચઞ્ચલનિરીક્ષણવિભ્રમસ્તે ।
ધૈર્યં વિધૂય તનુતે હૃદિ રાગબન્ધં
શમ્ભોસ્તદેવ વિપરીતતયા મુનીનામ્ ॥ ૬૧॥

જન્તોઃ સકૃત્પ્રણમતો જગદીડ્યતાં ચ
તેજાસ્વિતાં ચ નિશિતાં ચ મતિં સભાયામ્ ।
કામાક્ષિ માક્ષિકઝરીમિવ વૈખરીં ચ
લક્ષ્મીં ચ પક્ષ્મલયતિ ક્ષણવીક્ષણં તે ॥ ૬૨॥

કાદમ્બિની કિમયતે ન જલાનુષઙ્ગં
ભૃઙ્ગાવલી કિમુરરીકુરુતે ન પદ્મમ્ ।
કિં વા કલિન્દતનયા સહતે ન ભઙ્ગં
કામાક્ષિ નિશ્ચયપદં ન તવાક્ષિલક્ષ્મીઃ ॥ ૬૩॥

કાકોલપાવકતૃણીકરણેઽપિ દક્ષઃ
કામાક્ષિ બાલકસુધાકરશેખરસ્ય ।
અત્યન્તશીતલતમોઽપ્યનુપારતં તે
ચિત્તં વિમોહયતિ ચિત્રમયં કટાક્ષઃ ॥ ૬૪॥

કાર્પણ્યપૂરપરિવર્ધિતમમ્બ મોહ-
કન્દોદ્ગતં ભવમયં વિષપાદપં મે ।
તુઙ્ગં છિનત્તુ તુહિનાદ્રિસુતે ભવત્યાઃ
કાઞ્ચીપુરેશ્વરિ કટાક્ષકુઠારધારા ॥ ૬૫॥

કામાક્ષિ ઘોરભવરોગચિકિત્સનાર્થ-

મભ્યર્થ્ય દેશિકકટાક્ષભિષક્પ્રસાદાત્ ।
તત્રાપિ દેવિ લભતે સુકૃતી કદાચિ-
દન્યસ્ય દુર્લભમપાઙ્ગમહૌષધં તે ॥ ૬૬॥

કામાક્ષિ દેશિકકૃપાંકુરમાશ્રયન્તો
નાનાતપોનિયમનાશિતપાશબન્ધાઃ ।
વાસાલયં તવ કટાક્ષમમું મહાન્તો
લબ્ધ્વા સુખં સમાધિયો વિચરન્તિ લોકે ॥ ૬૭॥

સાકૂતસંલપિતસમ્ભૃતમુગ્ધહાસં
વ્રીડાનુરાગસહચારિ વિલોકનં તે ।
કામાક્ષિ કામપરિપન્થિનિ મારવીર-
સામ્રાજ્યવિભ્રમદશાં સફલીકરોતિ ॥ ૬૮॥

કામાક્ષિ વિભ્રમબલૈકનિધિર્વિધાય
ભ્રૂવલ્લિચાપકુટિલીકૃતિમેવ ચિત્રમ્ ।
સ્વાધીનતાં તવ નિનાય શશાઙ્કમૌલે-
રઙ્ગાર્ધરાજ્યસુખલાભમપાઙ્ગવીરઃ ॥ ૬૯॥

કામાંકુરૈકનિલયસ્તવ દૃષ્ટિપાતઃ
કામાક્ષિ ભક્તમનસાં પ્રદદાતુ કામાન્ ।
રાગાન્વિતઃ સ્વયમપિ પ્રકટીકરોતિ
વૈરાગ્યમેવ કથમેષ મહામુનીનામ્ ॥ ૭૦॥

કાલામ્બુવાહનિવહૈઃ કલહાયતે તે
કામાક્ષિ કાલિમમદેન સદા કટાક્ષઃ ।
ચિત્રં તથાપિ નિતરામમુમેવ દૃષ્ટ્વા
સોત્કણ્ઠ એવ રમતે કિલ નીલકણ્ઠઃ ॥ ૭૧॥

કામાક્ષિ મન્મથરિપું પ્રતિ મારતાપ-
મોહાન્ધકારજલદાગમનેન નૃત્યન્ ।
દુષ્કર્મકઞ્ચુકિકુલં કબલીકરોતુ
વ્યામિશ્રમેચકરુચિસ્ત્વદપાઙ્ગકેકી ॥ ૭૨॥

કામાક્ષિ મન્મથરિપોરવલોકનેષુ
કાન્તં પયોજમિવ તાવકમક્ષિપાતમ્ ।
પ્રેમાગમો દિવસવદ્વિકચીકરોતિ

લજ્જાભરો રજનિવન્મુકુલીકરોતિ ॥ ૭૩॥

મૂકો વિરિઞ્ચતિ પરં પુરુષઃ કુરૂપઃ
કન્દર્પતિ ત્રિદશરાજતિ કિમ્પચાનઃ ।
કામાક્ષિ કેવલમુપક્રમકાલ એવ
લીલાતરઙ્ગિતકટાક્ષરુચઃ ક્ષણં તે ॥ ૭૪॥

નીલાલકા મધુકરન્તિ મનોજ્ઞનાસા-
મુક્તારુચઃ પ્રકટકન્દબિસાઙ્કુરન્તિ ।
કારુણ્યમમ્બ મકરન્દતિ કામકોટિ
મન્યે તતઃ કમલમેવ વિલોચનં તે ॥ ૭૫॥

આકાંક્ષ્યમાણફલદાનવિચક્ષણાયાઃ ।
કામાક્ષિ તાવકકટાક્ષકકામધેનોઃ ।
સમ્પર્ક એવ કથમમ્બ વિમુક્તપાશ-
બન્ધાઃ સ્ફુટં તનુભૃતઃ પશુતાં ત્યજન્તિ ॥ ૭૬॥

સંસારઘર્મપરિતાપજુષાં નરાણાં
કામાક્ષિ શીતલતરાણિ તવેક્ષિતાનિ ।
ચન્દ્રાતપન્તિ ઘનચન્દનકર્દમન્તિ
મુક્તાગુણન્તિ હિમવારિનિષેચનન્તિ ॥ ૭૭॥

પ્રેમામ્બુરાશિસતતસ્નપિતાનિ ચિત્રં
કામાક્ષિ તાવકકટાક્ષનિરીક્ષણાનિ ।
સન્ધુક્ષયન્તિ મુહુરિન્ધનરાશિરીત્યા
મારદ્રુહો મનસિ મન્મથચિત્રભાનુમ્ ॥ ૭૮॥

કાલાઞ્જનપ્રતિભટં કમનીયકાન્ત્યા
કન્દર્પતન્ત્રકલયા કલિતાનુભાવમ્ ।
કાઞ્ચીવિહારરસિકે કલુષાર્તિચોરં
કલ્લોલયસ્વ મયિ તે કરુણાકટાક્ષમ્ ॥ ૭૯॥

ક્રાન્તેન મન્મથદેન વિમોહ્યમાન-
સ્વાન્તેન ચૂતતરુમૂલગતસ્ય પુંસઃ ।
કાન્તેન કિંચિદવલોકય લોચનસ્ય
પ્રાન્તેન માં જનનિ કાઞ્ચિપુરીવિભૂષે ॥ ૮૦॥

કામાક્ષિ કોઽપિ સુજનાસ્ત્વદપાઙ્ગસંગે
કણ્ઠેન કન્દલિતકાલિમસમ્પ્રદાયાઃ ।
ઉત્તંસકલ્પિતચકોરકુટુમ્બપોષા
નક્તન્દિવસપ્રસવભૂનયના ભવન્તિ ॥ ૮૧॥

નીલોત્પલપ્રસવકાન્તિનિર્દશનેન
કારુણ્યવિભ્રમજુષા તવ વીક્ષણેન ।
કામાક્ષિ કર્મજલધેઃ કલશીસુતેન
પાશત્રયાદ્વયમમી પરિમોચનીયાઃ ॥ ૮૨॥

અત્યન્તચઞ્ચલમકૃત્રિમમઞ્જનં કિં
ઝંકારભઙ્ગિરહિતા કિમુ ભૃઙ્ગમાલા ।
ધૂમાઙ્કુરઃ કિમુ હુતાશનસંગહીનઃ
કામાક્ષિ નેત્રરુચિનીલિમકન્દલી તે ॥ ૮૩॥

કામાક્ષિ નિત્યમયમઞ્જલિરસ્તુ મુક્તિ-
બીજાય વિભ્રમમદોદયઘૂર્ણિતાય ।
કન્દર્પદર્પપુનરુદ્ભવસિદ્ધિદાય
કલ્યાણદાય તવ દેવિ દૃગઞ્ચલાય ॥ ૮૪॥

દર્પાઙ્કુરો મકરકેતનવિભ્રમાણાં
નિન્દાઙ્કુરો વિદલિતોત્પલચાતુરીણામ્ ।
દીપાઙ્કુરો ભવતમિસ્રકદમ્બકાનાં
કામાક્ષિ પાલયતુ માં ત્વદપાઙ્ગપાતઃ ॥ ૮૫॥

કૈવલ્યદિવ્યમણિરોહણપર્વતેભ્યઃ
કારુણ્યનિર્ઝરપયઃકૃતમઞ્જનેભ્યઃ ।
કામાક્ષિ કિંકરિતશઙ્કરમાનસેભ્ય-
સ્તેભ્યો નમોઽસ્તુ તવ વીક્ષણવિભ્રમેભ્યઃ ॥ ૮૬॥

અલ્પીય એવ નવમુત્પલમમ્બ હીના
મીનસ્ય વા સરણિરમ્બુરુહાં ચ કિં વા ।
દૂરે મૃગીદૃગસમઞ્જસમઞ્જનં ચ
કામાક્ષિ વીક્ષણરુચૌ તવ તર્કયામઃ ॥ ૮૭॥

મિશ્રીભવદ્ગરલપઙ્કિલશઙ્કરોરસ્-
સીમાઙ્ગણે કિમપિ રિઙ્ખણમાદધાનઃ ।

હેલાવધૂતલલિતશ્રવણોત્પલોઽસૌ
કામાક્ષિ બાલ ઇવ રાજતિ તે કટાક્ષઃ ॥ ૮૮॥

પ્રૌઢિકરોતિ વિદુષાં નવસૂક્તિધાટી-
ચૂતાટવીષુ બુધકોકિલલાલ્યમાનમ્ ।
માધ્વીરસં પરિમલં ચ નિરર્ગલં તે
કામાક્ષિ વીક્ષણવિલાસવસન્તલક્ષ્મીઃ ॥ ૮૯॥

કૂલંકષં વિતનુતે કરુણામ્બુવર્ષી
સારસ્વતં સુકૃતિનઃ સુલભં પ્રવાહમ્ ।
તુચ્છીકરોતિ યમુનામ્બુતરઙ્ગભઙ્ગીં
કામાક્ષિ કિં તવ કટાક્ષમહામ્બુવાહઃ ॥ ૯૦॥

જગર્તિ દેવિ કરુણાશુકસુન્દરી તે
તાટઙ્કરત્નરુચિદાડિમખણ્ડશોણે ।
કામાક્ષિ નિર્ભરકટાક્ષમરીચિપુઞ્જ-
માહેન્દ્રનીલમણિપઞ્જરમધ્યભાગે ॥ ૯૧॥

કામાક્ષિ સત્કુવલયસ્ય સગોત્રભાવા-
દાક્રામતિ શ્રુતિમસૌ તવ દૃષ્ટિપાતઃ ।
કિંચ સ્ફુટં કુટિલતાં પ્રકટીકરોતિ
ભ્રૂવલ્લરીપરિચિતસ્ય ફલં કિમેતત્ ॥ ૯૨॥

એષા તવાક્ષિસુષમા વિષમાયુધસ્ય
નારાચવર્ષલહરી નગરાજકન્યે ।
શંકે કરોતિ શતધા હૃદિ ધૈર્યમુદ્રાં
શ્રીકામકોટિ યદસૌ શિશિરાંશુમૌલેઃ ॥ ૯૩॥

બાણેન પુષ્પધનુષઃ પરિકલ્પ્યમાન-
ત્રાણેન ભક્તમનસાં કરુણાકરેણ ।
કોણેન કોમલદૃશસ્તવ કામકોટિ
શોણેન શોષય શિવે મમ શોકસિન્ધુમ્ ॥ ૯૪॥

મારદ્રુહા મુકુટસીમનિ લાલ્યમાને
મન્દાકિનીપયસિ તે કુટિલં ચરિષ્ણુઃ ।
કામાક્ષિ કોપરભસાદ્વલમાનમીન-
સન્દેહમઙ્કુરયતિ ક્ષણમક્ષિપાતઃ ॥ ૯૫॥

કામાક્ષિ સંવલિતમૌક્તિકકુણ્ડલાંશુ-
ચઞ્ચત્સિતશ્રવણચામરચાતુરીકઃ ।
સ્તમ્ભે નિરન્તરમપાઙ્ગમયે ભવત્યા
બદ્ધશ્ચકાસ્તિ મકરધ્વજમત્તહસ્તી ॥ ૯૬॥

યાવત્કટાક્ષરજનીસમયાગમસ્તે
કામાક્ષિ તાવદચિરાન્નમતાં નરાણામ્ ।
આવિર્ભવત્યમૃતદીધિતિબિમ્બમમ્બ
સંવિન્મયં હૃદયપૂર્વગિરીન્દ્રશૃઙ્ગે ॥ ૯૭॥

કામાક્ષિ કલ્પવિટપીવ ભવત્કટાક્ષો
દિત્સુઃ સમસ્તવિભવં નમતાં નરાણામ્ ।
ભૃઙ્ગસ્ય નીલનલિનસ્ય ચ કાન્તિસમ્પ-
ત્સર્વસ્વમેવ હરતીતિ પરં વિચિત્રમ્ ॥ ૯૮॥

અત્યન્તશીતલમનર્ગલકર્મપાક-
કાકોલહારિ સુલભં સુમનોભિરેતત્ ।
પીયૂષમેવ તવ વીક્ષણમમ્બ કિન્તુ
કામાક્ષિ નીલમિદમિત્યયમેવ ભેદઃ ॥ ૯૯॥

અજ્ઞાતભક્તિરસમપ્રસરદ્વિવેક-
મત્યન્તગર્વમનધીતસમસ્તશાસ્ત્રમ્ ।
અપ્રાપ્તસત્યમસમીપગતં ચ મુક્તેઃ
કામાક્ષિ નૈવ તવ સ્પૃહયતિ દૃષ્ટિપાતઃ ॥ ૧૦૦॥

(કામાક્ષિ મામવતુ તે કરુણાકટાક્ષઃ)
પાતેન લોચનરુચેસ્તવ કામકોટિ
પોતેન પતકપયોધિભયાતુરાણામ્ ।
પૂતેન તેન નવકાઞ્ચનકુણ્ડલાંશુ-
વીતેન શીતલય ભૂધરકન્યકે મામ્ ॥ ૧૦૧॥

કટાક્ષશતકં સમ્પૂર્ણમ્ ॥

## ॥ મન્દસ્મિતશતકમ્ ॥

બધ્નીમો વયમઞ્જલિં પ્રતિદિનં બન્ધચ્છિદે દેહિનાં
કન્દર્પાગમતન્ત્રમૂલગુરવે કલ્યાણકેલીભુવે ।
કામાક્ષ્યા ઘનસારપુઞ્જરજસે કામદ્રુહશ્ચક્ષુષાં
મન્દારસ્તબકપ્રભામદમુષે મન્દસ્મિતજ્યોતિષે ॥ ૧॥

સધ્રીચે નવમલ્લિકાસુમનસાં નાસાગ્રમુક્તામણે-
રાચાર્યાય મૃણાલકાણ્ડમહસાં નૈસર્ગિકાય દ્વિષે ।
સ્વર્ધુન્યા સહ યુધ્વેન હિમરુચેરર્ધાસનાધ્યાસિને
કામાક્ષ્યાઃ સ્મિતમઞ્જરીધવલિમાદ્વૈતાય તસ્મૈ નમઃ ॥ ૨॥

કર્પૂરદ્યુતિચાતુરીમતિતરામલ્પીયસીં કુર્વતી
દૌર્ભાગ્યોદયમેવ સંવિદધતી દૌષાકરીણાં ત્વિષામ્ ।
ક્ષુલ્લાનેવ મનોજ્ઞમલ્લિનિકરાન્ફુલ્લાનપિ વ્યઞ્જતી
કામાક્ષ્યા મૃદુલસ્મિતાંશુલહરી કામપ્રસૂરસ્તુ મે ॥ ૩॥

યા પીનસ્તનમણ્ડલોપરિ લસત્કર્પૂરલેપાયતે
યા નીલેક્ષણરાત્રિકાન્તિતતિષુ જ્યોત્સ્નાપ્રરોહાયતે ।
યા સૌન્દર્યધુનીતરઙ્ગતતિષુ વ્યાલોલહંસાયતે
કામાક્ષ્યાઃ શિશિરીકરોતુ હૃદયં સા મે સ્મિતપ્રાચુરી ॥ ૪॥

યેષાં ગચ્છતિ પૂર્વપક્ષસરણિં કૌમુદ્વતઃ શ્વેતિમા
યેષાં સન્તતમારુરુક્ષતિ તુલાકક્ષ્યાં શરચ્ચન્દ્રમાઃ ।
યેષામિચ્છતિ કમ્બુરપ્યસુલભામન્તેવસત્પ્રક્રિયાં
કામાક્ષ્યા મમતાં હરન્તુ મમ તે હાસત્વિષામઙ્કુરાઃ ॥ ૫॥

આશાસીમસુ સન્તતં વિદધતી નૈશાકરીં વ્યાક્રિયાં
કાશાનામભિમાનભઙ્ગકલનાકૌશલ્યમાબિભ્રતી ।
ઈશાનેન વિલોકિતા સકુતુકં કામાક્ષિ તે કલ્મષ-
ક્લેશાપાયકરી ચકાસ્તિ લહરી મન્દસ્મિતજ્યોતિષામ્ ॥ ૬॥

આરૂઢસ્ય સમુન્નતસ્તનતટીસામ્રાજ્યસિંહાસનં

કન્દર્પસ્ય વિભોર્જગત્રયપ્રાકટ્યમુદ્રાનિધેઃ ।
યસ્યાશ્ચામરચાતુરીં કલયતે રશ્મિચ્છટા ચઞ્ચલા
સા મન્દસ્મિતમઞ્જરી ભવતુ નઃ કામાય કામાક્ષિ તે ॥ ૭॥

શમ્ભોર્યા પરિરમ્ભસમ્ભ્રમવિધૌ નૈર્મલ્યસીમાનિધિઃ
ગૈર્વાણીવ તરઙ્ગિણી કૃતમૃદુસ્યન્દાં કલિન્દાત્મજામ્ ।
કલ્માષીકુરુતે કલઙ્કસુષમાં કણ્ઠસ્થલીચુમ્બિનીં
કામાક્ષ્યાઃ સ્મિતકન્દલી ભવતુ નઃ કલ્યાણસન્દોહિની ॥ ૮॥

જેતું હારલતામિવ સ્તનતટીં સંજગ્મુષી સન્તતં
ગન્તું નિર્મલતામિવ દ્વિગુણિતાં મગ્ના કૃપાસ્ત્રોતસિ ।
લબ્ધું વિસ્મયનીયતામિવ હરં રાગાકુલં કુર્વતી
મઞ્જુસ્તે સ્મિતમઞ્જરી ભવભયં મથ્નાતુ કામાક્ષિ મે ॥ ૯॥

શ્વેતાપિ પ્રકટં નિશાકરરુચાં માલિન્યમાતન્વતી
શીતાપિ સ્મરપાવકં પશુપતેઃ સન્ધુક્ષયન્તી સદા ।
સ્વાભાવ્યાદધરાશ્રિતાપિ નમતામુચ્ચૈર્દિશન્તી ગતિં
કામાક્ષિ સ્ફુટમન્તરા સ્ફુરતુ નસ્ત્વન્મન્દહાસપ્રભા ॥ ૧૦॥

વક્ત્રશ્રીસરસીજલે તરલિતભ્રૂવલ્લિકલ્લોલિતે
કાલિમ્ના દધતી કટાક્ષજનુષા માધુવ્રતીં વ્યાપૃતિમ્ ।
નિર્નિદ્રામલપુણ્ડરીકકુહનાપાણ્ડિત્યમાબિભ્રતી
કામાક્ષ્યાઃ સ્મિતચાતુરી મમ મનઃ કાતર્યમુન્મૂલયેત્ ॥ ૧૧॥

નિત્યં બાધિતબન્ધુજીવમધરં મૈત્રીજુષં પલ્લવૈઃ
શુદ્ધસ્ય દ્વિજમણ્ડલસ્ય ચ તિરસ્કર્તારમપ્યાશ્રિતા ।
યા વૈમલ્યવતી સદૈવ નમતાં ચેતઃ પુનીતેતરાં
કામાક્ષ્યા હૃદયં પ્રસાદયતુ મે સા મન્દહાસપ્રભા ॥ ૧૨॥

દ્રુહ્યન્તી તમસે મુહુઃ કુમુદિનીસાહાય્યમાબિભ્રતી
યાન્તી ચન્દ્રકિશોરશેખરવપુઃસૌધાઙ્ગણે પ્રેઙ્ખણમ્ ।
જ્ઞાનામ્ભોનિધિવીચિકાં સુમનસાં કૂલંકષાં કુર્વતી
કામાક્ષ્યાઃ સ્મિતકૌમુદી હરતુ મે સંસારતાપોદયમ્ ॥ ૧૩॥

કાશ્મીરદ્રવધાતુકર્દમરુચા કલ્માષતાં બિભ્રતી
હંસૌઘૈરિવ કુર્વતી પરિચિતિં હારીકૃતૈર્મૌક્તિકૈઃ ।
વક્ષોજન્મતુષારશૈલકટકે સંચારમાતન્વતી

કામાક્ષ્યા મૃદુલસ્મિતદ્યુતિમયી ભાગીરથી ભાસતે ॥ ૧૪॥

કમ્બોર્વંશપરમ્પરા ઇવ કૃપાસન્તાનવલ્લીભુવઃ
સમ્ફુલ્લસ્તબકા ઇવ પ્રસૃમરા મૂર્તાઃ પ્રસાદા ઇવ ।
વાક્પીયૂષકણા ઇવ ત્રિપથગાપર્યાયભેદા ઇવ
ભ્રાજન્તે તવ મન્દહાસકિરણાઃ કાઞ્ચીપુરીનાયિકે ॥ ૧૫॥

વક્ષોજે ઘનસારપત્રરચનાભઙ્ગીસપત્નાયિતા
કણ્ઠે મૌક્તિકહારયષ્ટિકિરણવ્યાપારમુદ્રાયિતા ।
ઓષ્ઠશ્રીનિકુરુમ્બપલ્લવપુટે પ્રેઙ્ખત્પ્રસૂનાયિતા
કામાક્ષિ સ્ફુરતાં મદીયહૃદયે ત્વન્મન્દહાસપ્રભા ॥ ૧૬॥

યેષાં બિન્દુરિવોપરિ પ્રચલિતો નાસાગ્રમુક્તામણિઃ
યેષાં દીન ઇવાધિકણ્ઠમયતે હારઃ કરાલમ્બનમ્ ।
યેષાં બન્ધુરિવોષ્ઠયોરરુણિમા ધત્તે સ્વયં રઞ્જનં
કામાક્ષ્યાઃ પ્રભવન્તુ તે મમ શિવોલ્લાસાય હાસાઙ્કુરાઃ ॥ ૧૭॥

યા જાડ્યામ્બુનિધિં ક્ષિણોતિ ભજતાં વૈરાયતે કૈરવૈઃ
નિત્યં યાં નિયમેન યા ચ યતતે કર્તું ત્રિણેત્રોત્સવમ્ ।
બિમ્બં ચાન્દ્રમસં ચ વઞ્ચયતિ યા ગર્વેણ સા તાદૃશી
કામાક્ષિ સ્મિતમઞ્જરી તવ કથં જ્યોત્સ્નેત્યસૌ કીર્ત્યતે ॥ ૧૮॥

આરુઢા રભસાત્પુરઃ પુરરિપોરાશ્લેષણોપક્રમે
યા તે માતરુપૈતિ દિવ્યતટિનીશઙ્કાકરી તત્ક્ષણમ્ ।
ઓષ્ઠૌ વેપયતિ ભ્રુવૌ કુટિલયત્યાનમ્રયત્યાનનં
તાં વન્દે મૃદુહાસપૂરસુષમામેકામ્રનાથપ્રિયે ॥ ૧૯॥

વક્ત્રેન્દોસ્તવ ચન્દ્રિકા સ્મિતતતિર્વલ્ગુ સ્ફુરન્તી સતાં
સ્યાચ્ચેદ્યુક્તિમિદં ચકોરમનસાં કામાક્ષિ કૌતૂહલમ્ ।
એતચ્ચિત્રમહર્નિશં યદધિકામેષા રુચિં ગાહતે
બિમ્બોષ્ઠદ્યુમણિપ્રભાસ્વપિ ચ યદ્બિમ્બોકમાલમ્બતે ॥ ૨૦॥

સાદૃશ્યં કલશામ્બુધેર્વહતિ યત્કામાક્ષિ મન્દસ્મિતં
શોભામોષ્ઠરુચામ્બ વિદ્રુમભવામેતાદ્ભિદાં બ્રૂમહે ।
એકસ્માદુદિતં પુરા કિલ પપૌ શર્વઃ પુરાણઃ પુમાન્
એતન્મધ્યસમુદ્ભવં રસયતે માધુર્યરૂપં રસમ્ ॥ ૨૧॥

ઉત્તુઙ્ગસ્તનકુમ્ભશૈલકટકે વિસ્તારિકસ્તૂરિકા-
પત્રશ્રીજુષિ ચઞ્ચલાઃ સ્મિતરુચઃ કામાક્ષિ તે કોમલાઃ ।
સન્ધ્યાદીધિતિરઞ્જિતા ઇવ મુહુઃ સાન્દ્રાધરજ્યોતિષા
વ્યાલોલામલશારદાભ્રશકલવ્યાપારમાતન્વતે ॥ ૨૨॥

ક્ષીરં દૂરત એવ તિષ્ઠતુ કથં વૈમલ્યમાત્રાદિદં
માતસ્તે સહપાઠવીથિમયતાં મન્દસ્મિતૈર્મઞ્જુલૈઃ ।
કિં ચેયં તુ ભિદાસ્તિ દોહનવશાદેકં તુ સંજાયતે
કામાક્ષિ સ્વયમર્થિતં પ્રણમતામન્યત્તુ દોદુહ્યતે ॥ ૨૩॥

કર્પૂરૈરમૃતૈર્જગજ્જનનિ તે કામાક્ષિ ચન્દ્રાતપૈઃ
મુક્તાહારગુણૈર્મૃણાલવલયૈર્મુગ્ધસ્મિતશ્રીરિયમ્ ।
શ્રીકાઞ્ચીપુરનાયિકે સમતયા સંસ્તૂયતે સજ્જનૈઃ
તત્તાદૃઙ્મમ તાપશાન્તિવિધયે કિં દેવિ મન્દાયતે ॥ ૨૪॥

મધ્યેગર્ભિતમઞ્જુવાક્યલહરીમાધ્વીઝરીશીતલા
મન્દારસ્તબકાયતે જનનિ તે મન્દસ્મિતાંશુચ્છટા ।
યસ્યા વર્ધયિતું મુહુર્વિકસનં કામાક્ષિ કામદ્રુહો
વલ્ગુર્વીક્ષણવિભ્રમવ્યતિકરો વાસન્તમાસાયતે ॥ ૨૫॥

બિમ્બોષ્ઠદ્યુતિપુઞ્જરઞ્જિતરુચિસ્ત્વન્મન્દહાસચ્છટા ।
કલ્યાણં ગિરિસાર્વભૌમતનયે કલ્લોલયત્વાશુ મે ।
ફુલ્લન્મલ્લિપિનદ્ધહલ્લકમયી માલેવ યા પેશલા
શ્રીકાઞ્ચીશ્વરિ મારમર્દિતુરુરોમધ્યે મુહુર્લમ્બતે ॥ ૨૬॥

બિભ્રાણા શરદભ્રવિભ્રમદશાં વિદ્યોતમાનાપ્યસૌ
કામાક્ષિ સ્મિતમઞ્જરી કિરતિ તે કારુણ્યધારારસમ્ ।
આશ્ચર્યં શિશિરીકરોતિ જગતીશ્ચાલોક્ય ચૈનામહો
કામં ખેલતિ નીલકણ્ઠહૃદયં કૌતૂહલાન્દોલિતમ્ ॥ ૨૭॥

પ્રેઙ્ખત્પ્રૌઢકટાક્ષકુઞ્જકુહરેષ્વત્યચ્છગુચ્છાયિતં
વક્ત્રેન્દુચ્છવિસિન્ધુવીચિનિચયે ફેનપ્રતાનાયિતમ્ ।
નૈરન્તર્યવિજૃમ્ભિતસ્તનતટે નૈચોલપટ્ટાયિતં
કાલુષ્યં કબલીકરોતુ મમ તે કામાક્ષિ મન્દસ્મિતમ્ ॥ ૨૮॥

પીયૂષં તવ મન્થરસ્મિતમિતિ વ્યર્થૈવ સાપપ્રથા
કામાક્ષિ ધ્રુવમીદૃશં યદિ ભવેદેતત્કથં વા શિવે ।

મન્દારસ્ય કથાલવં ન સહતે મથ્નાતિ મન્દાકિની-
મિન્દું નિન્દતિ કીર્તિતેઽપિ કલશીપાથોધિમીર્ષ્યાયતે ॥ ૨૯॥

વિશ્વેષાં નયનોત્સવં વિતનુતાં વિદ્યોતતાં ચન્દ્રમા
વિખ્યાતો મદનાન્તકેન મુકુટીમધ્યે ચ સંમાન્યતામ્ ।
આઃ કિં જાતમનેન હાસસુષમામાલોક્ય કામાક્ષિ તે
કાલઙ્કીમવલમ્બતે ખલુ દશાં કલ્માષહીનોઽપ્યસૌ ॥ ૩૦॥

ચેતઃ શીતલયન્તુ નઃ પશુપતેરાનન્દજીવાતવો
નમ્રાણાં નયનાધ્વસીમસુ શરચ્ચન્દ્રાતપોપક્રમાઃ ।
સંસારાખ્યસરોરુહાકરખલીકારે તુષારોત્કરાઃ
કામાક્ષિ સ્મરકીર્તિબીજનિકરાસ્ત્વન્મન્દહાસાઙ્કુરાઃ ॥ ૩૧॥

કર્મૌઘાખ્યતમઃકચાકચિકરાન્કામાક્ષિ સંચિન્તયે
ત્વન્મન્દસ્મિતરોચિષાં ત્રિભુવનક્ષેમંકરાનઙ્કુરાન્ ।
યે વક્ત્રં શિશિરશ્રિયો વિકસિતં ચન્દ્રાતપામ્ભોરુહ-
દ્વેષોદ્ઘેષોણચાતુરીમિવ તિરસ્કર્તું પરિષ્કુર્વતે ॥ ૩૨॥

કુર્યુર્નઃ કુલશૈલરાજતનયે કૂલંકષં મઙ્ગલં
કુન્દસ્પર્ધનચુઞ્ચવસ્તવ શિવે મન્દસ્મિતપ્રક્રમાઃ ।
યે કામાક્ષિ સમસ્તસાક્ષિનયનં સન્તોષયન્તીશ્વરં
કર્પૂરપ્રકરા ઇવ પ્રસૃમરાઃ પુંસામસાધારણાઃ ॥ ૩૩॥

કમ્રેણ સ્નપયસ્વ કર્મકુહનાચોરેણ મારાગમ-
વ્યાખ્યાશિક્ષણદીક્ષિતેન વિદુષામક્ષીણલક્ષ્મીપુષા ।
કામાક્ષિ સ્મિતકન્દલેન કલુષસ્ફોટક્રિયાચુઞ્ચુના
કારુણ્યામૃતવીચિકાવિહરણપ્રાચુર્યધુર્યેણ મામ્ ॥ ૩૪॥

ત્વન્મન્દસ્મિતકન્દલસ્ય નિયતં કામાક્ષિ શઙ્કામહે
બિમ્બઃ કશ્ચન નૂતનઃ પ્રચલિતો નૈશાકરઃ શીકરઃ ।
કિંચ ક્ષીરપયોનિધિઃ પ્રતિનિધિઃ સ્વર્વાહિનીવીચિકા-
બિબ્વોકોઽપિ વિડમ્બ એવ કુહના મલ્લીમતલ્લીરુચઃ ॥ ૩૫॥

દુષ્કર્માર્કનિસર્ગકર્કશમહસ્સમ્પર્કતપ્તં મિલ-
ત્પઙ્કં શઙ્કરવલ્લભે મમ મનઃ કાઞ્ચીપુરાલંક્રિયે ।
અમ્બ ત્વન્મૃદુલસ્મિતામૃતરસે મઙ્ક્ત્વા વિધૂય વ્યથા-
માનન્દોદયસૌધશ‌ૃઙ્ગપદવીમારોઢુમાકાઙ્ક્ષતિ ॥ ૩૬॥

નમ્રાણાં નગરાજશેખરસુતે નાકાલયાનાં પુરઃ
કામાક્ષિ ત્વરયા વિપત્પ્રશમેન કારુણ્યધારાઃ કિરન્ ।
આગચ્છન્તમનુગ્રહં પ્રકટયન્નાનન્દબીજાનિ તે
નાસીરે મૃદુહાસ એવ તનુતે નાથે સુધાશીતલઃ ॥ ૩૭॥

કામાક્ષિ પ્રથમાનવિભ્રમનિધિઃ કન્દર્પદર્પપ્રસૂઃ
મુગ્ધસ્તે મૃદુહાસ એવ ગિરિજે મુષ્ણાતુ મે કિલ્બિષમ્ ।
યં દ્રષ્ટું વિહિતે કરગ્રહ ઉમે શમ્ભુસ્ત્રપામીલિતં
સ્વૈરં કારયતિ સ્મ તાણ્ડવવિનોદાનન્દિના તણ્ડુના ॥ ૩૮॥

ક્ષુણ્ણં કેનચિદેવ ધીરમનસા કુત્રાપિ નાનાજનૈઃ
કર્મગ્રન્થિનિયન્ત્રિતૈરસુગમં કામાક્ષિ સામાન્યતઃ ।
મુગ્ધૈર્દ્રષ્ટુમશક્યમેવ મનસા મૂઢસય મે મૌક્તિકં
માર્ગં દર્શયતુ પ્રદીપ ઇવ તે મન્દસ્મિતશ્રીરિયમ્ ॥ ૩૯॥

જ્યોત્સ્નાકાન્તિભિરેવ નિર્મલતરં નૈશાકરં મણ્ડલં
હંસૈરેવ શરદ્વિલાસસમયે વ્યાકોચમમ્ભોરુહમ્ ।
સ્વચ્છૈરેવ વિકસ્વરૈરુડુગુણૈઃ કામાક્ષિ બિમ્બં દિવઃ
પુણ્યૈરેવ મૃદુસ્મિતૈસ્તવ મુખં પુષ્ણાતિ શોભાભરમ્ ॥ ૪૦॥

માનગ્રન્થિવિધુન્તુદેન રભસાદાસ્વાદ્યમાને નવ-
પ્રેમાડમ્બરપૂર્ણિમાહિમકરે કામાક્ષિ તે તત્ક્ષણમ્ ।
આલોક્ય સ્મિતચન્દ્રિકાં પુનરિમામુન્મીલનં જગ્મુષીં
ચેતઃ શીલયતે ચકોરચરિતં ચન્દ્રાર્ધચૂડામણેઃ ॥ ૪૧॥

કામાક્ષિ સ્મિતમઞ્જરીં તવ ભજે યસ્યાસ્ત્વિષામઙ્કુરા-
નાપીનસ્તનપાનલાલસતયા નિશ્શઙ્કમઙ્કેશયઃ ।
ઊર્ધ્વં વીક્ષ્ય વિકર્ષતિ પ્રસૃમરાનુદ્દામયા શુણ્ડયા
સૂનુસ્તે બિસશઙ્કયાશુ કુહનાદન્તાવલગ્રામણીઃ ॥ ૪૨॥

ગાઢાશ્લેષવિમર્દસમ્ભ્રમવશાદુદ્દામમુક્તાગુણ-
પ્રાલમ્બે કુચકુમ્ભયોર્વિગલિતે દક્ષદ્વિષો વક્ષસિ ।
યા સખ્યેન પિનહ્યતિ પ્રચુરયા ભાસા તદીયાં દશાં
સા મે ખેલતુ કામકોટિ હૃદયે સાન્દ્રસ્મિતાંશુચ્છટા ॥ ૪૩॥

મન્દારે તવ મન્થરસ્મિતરુચાં માત્સર્યમાલોક્યતે

કામાક્ષિ સ્મરશાસને ચ નિયતો રાગોદયો લક્ષ્યતે ।
ચાન્દ્રીષુ દ્યુતિમઞ્જરીષુ ચ મહાન્દ્વેષાઙ્કુરો દૃશ્યતે
શુદ્ધાનાં કથમીદૃશી ગિરિસુતેઽતિશુદ્ધા દશા કથ્યતામ્ ॥ ૪૪॥

પીયૂષં ખલુ પીયતે સુરજનૈર્દુગ્ધામ્બુધિર્મથ્યતે
માહેશૈશ્ચ જટાકલાપનિગડૈર્મન્દાકિની નહ્યતે ।
શીતાંશુઃ પરિભૂયતે ચ તમસા તસ્માદનેતાદૃશી
કામાક્ષિ સ્મિતમઞ્જરી તવ વચોવૈદગ્ધ્યમુલ્લઙ્ઘતે ॥ ૪૫॥

આશઙ્કે તવ મન્દહાસલહરીમન્યાદૃશીં ચન્દ્રિકા-
મેકામ્રેશકુટુમ્બિનિ પ્રતિપદં યસ્યાઃ પ્રભાસંગમે ।
વક્ષોજામ્બુરુહે ન તે રચયતઃ કાંચિદ્દશાં કૌઝ્મલી-
માસ્યામ્ભોરુહમમ્બ કિંચ શનકૈરાલમ્બતે ફુલ્લતામ્ ॥ ૪૬॥

આસ્તીર્ણાધરકાન્તિપલ્લવચયે પાતં મુહુર્જગ્મુષી
મારદ્રોહિણિ કન્દલત્સ્મરશરજ્વાલાવલીર્વ્યઞ્જતી ।
નિન્દન્તી ઘનસારહારવલયજ્યોત્સ્નામૃણાલાનિ તે
કામાક્ષિ સ્મિતચાતુરી વિરહિણીરીતિં જગાહેતરામ્ ॥ ૪૭॥

સૂર્યાલોકવિધૌ વિકાસમધિકં યાન્તી હરન્તી તમ-
સ્સન્દોહં નમતાં નિજસ્મરણતો દોષાકરદ્વેષિણી ।
નિર્યાન્તી વદનારવિન્દકુહરાન્નિર્ધૂતજાડ્યા નૃણાં
શ્રીકામાક્ષિ તવ સ્મિતદ્યુતિમયી ચિત્રીયતે ચન્દ્રિકા ॥ ૪૮॥

કુણ્ઠીકુર્યુરમી કુબોધઘટનામસ્મન્મનોમાથિનીં
શ્રીકામાક્ષિ શિવંકરાસ્તવ શિવે શ્રીમન્દહાસાઙ્કુરાઃ ।
યે તન્વન્તિ નિરન્તરં તરુણિમસ્તમ્બેરમગ્રામણી-
કુમ્ભદ્વન્દ્વવિડમ્બિનિ સ્તનતટે મુક્તાકુથાડમ્બરમ્ ॥ ૪૯॥

પ્રેઙ્ખન્તઃ શરદમ્બુદા ઇવ શનૈઃ પ્રેમાનિલૈઃ પ્રેરિતા
મજ્જન્તો મન્દનારિકણ્ઠસુષમાસિન્ધૌ મુહુર્મન્થરમ્ ।
શ્રીકામાક્ષિ તવ સ્મિતાંશુનિકરાઃ શ્યામાયમાનશ્રિયો
નીલામ્ભોધરનૈપુણીં તત ઇતો નિર્નિદ્રયન્ત્યઞ્જસા ॥ ૫૦॥

વ્યાપારં ચતુરાનનૈકવિહૃતૌ વ્યાકુર્વતી કુર્વતી
રુદ્રાક્ષગ્રહણં મહેશિ સતતં વાગૂર્મિકલ્લોલિતા ।
ઉત્ફુલ્લં ધવલારવિન્દમધરીકૃત્ય સ્ફુરન્તી સદા

શ્રીકામાક્ષિ સરસ્વતી વિજયતે ત્વન્મન્દહાસપ્રભા ॥ ૫૧॥

કર્પૂરદ્યુતિતસ્કરેણ મહસા કલ્માષયત્યાનનં
શ્રીકાઞ્ચીપુરનાયિકે પતિરિવ શ્રીમન્દહાસોઽપિ તે ।
આલિઙ્ગત્યતિપીવરાં સ્તનતટીં બિમ્બાધરં ચુમ્બતિ
પ્રૌઢં રાગભરં વ્યનક્તિ મનસો ધૈર્યં ધુનીતેતરામ્ ॥ ૫૨॥

વૈશદ્યેન ચ વિશ્વતાપહરણક્રીડાપટીયસ્તયા
પાણ્ડિત્યેન પચેલિમેન જગતાં નેત્રોત્સવોત્પાદેન ।
કામાક્ષિ સ્મિતકન્દલૈસ્તવ તુલામારોઢુમુદ્યોગિની
જ્યોત્સ્નાસૌ જલરાશિપોષણતયા દૂષ્યાં પ્રપન્ના દશામ્ ॥ ૫૩॥

લાવણ્યામ્બુજિનીમૃણાલવલયૈઃ શ‍ૃઙ્ગારગન્ધદ્વિપ-
ગ્રામણ્યઃ શ્રુતિચામરૈસ્તરુણિમસ્વારાજ્યતેજોઙ્કુરૈઃ ।
આનન્દામૃતસિન્ધુવીચિપૃષતૈરાસ્યાબ્જહંસૈસ્તવ
શ્રીકામાક્ષિ મથાન મન્દહસિતૈર્મત્કં મનઃકલ્મષમ્ ॥ ૫૪॥

ઉત્તુઙ્ગસ્તનમણ્ડલીપરિચલન્માણિક્યહારચ્છટા-
ચઞ્ચચ્છોણિમપુઞ્જમધ્યસરણિં માતઃ પરિષ્કુર્વતી ।
યા વૈદગ્ધ્યમુપૈતિ શંકરજટાકાન્તારવાટીપત-
ત્સ્વર્વાપીપયસઃ સ્મિતદ્યુતિરસૌ કામાક્ષિ તે મઞ્જુલા ॥ ૫૫॥

સન્નામૈકજુષા જનેન સુલભં સંસૂચયન્તી શનૈ-
રુત્તુઙ્ગસ્ય ચિરાદનુગ્રહતરોરુત્પત્સ્યમાનં ફલમ્ ।
પ્રાથમ્યેન વિકસ્વરા કુસુમવત્પ્રાગલ્ભ્યમભ્યેયુષી
કામાક્ષિ સ્મિતચાતુરી તવ મમ ક્ષેમંકરી કલ્પતામ્ ॥ ૫૬॥

ધાનુષ્કાગ્રસરસ્ય લોલકુટિલભ્રૂલેખયા બિભ્રતો
લીલાલોકશિલીમુખં નવવયસ્સામ્રાજ્યલક્ષ્મીપુષઃ ।
જેતું મન્મથમર્દિનં જનનિ તે કામાક્ષિ હાસઃ સ્વયં
વલ્ગુર્વિભ્રમભૂભૃતો વિતનુતે સેનાપતિપ્રક્રિયામ્ ॥ ૫૭॥

યન્નાકમ્પત કાલકૂટકબલીકારે ચુચુમ્બે ન યદ્-
ગ્લાન્યા ચક્ષુષિ રૂષિતાનલશિખે રુદ્રસ્ય તત્તાદૃશમ્ ।
ચેતો યત્પ્રસભં સ્મરજ્વરશિખિજ્વાલેન લેલિહ્યતે
તત્કામાક્ષિ તવ સ્મિતાંશુકલિકાહેલાભવં પ્રાભવમ્ ॥ ૫૮॥

સમ્ભિન્નેવ સુપર્વલોકતટિની વીચીચયૈર્યામુનૈઃ
સંમિશ્રેવ શશાઙ્કદીપ્તિલહરી નીલૈર્મહાનીરદૈઃ ।
કામાક્ષિ સ્ફુરિતા તવ સ્મિતરુચિઃ કાલાઞ્જનસ્પર્ધિના
કાલિમ્ના કચરોચિષાં વ્યતિકરે કાંચિદ્દશામશ્નુતે ॥ ૫૯॥

જાનીમો જગદીશ્વરપ્રણયિનિ ત્વન્મન્દહાસપ્રભાં
શ્રીકામાક્ષિ સરોજિનીમભિનવામેષા યતઃ સર્વદા ।
આસ્યેન્દોરવલોકેન પશુપતેરભ્યેતિ સમ્ફુલ્લતાં
તન્દ્રાલુસ્તદભાવ એવ તનુતે તદ્વૈપરીત્યક્રમમ્ ॥ ૬૦॥

યાન્તી લોહિતિમાનમભ્રતટિની ધાતુચ્છટાકર્દમૈઃ
ભાન્તી બાલગભસ્તિમાલિકિરણૈર્મેઘાવલી શારદી ।
બિમ્બોષ્ઠદ્યુતિપુઞ્જચુમ્બનકલાશોણાયમાનેન તે
કામાક્ષિ સ્મિતરોચિષા સમદશામારોઢુમાકાઙ્ક્ષતે ॥ ૬૧॥

શ્રીકામાક્ષિ મુખેન્દુભૂષણમિદં મન્દસ્મિતં તાવકં
નેત્રાનન્દકરં તથા હિમકરો ગચ્છેદ્યથા તિગ્મતામ્ ।
શીતં દેવિ તથા યથા હિમજલં સન્તાપમુદ્રાસ્પદં
શ્વેતં કિંચ તથા યથા મલિનતાં ધત્તે ચ મુક્તામણિઃ ॥ ૬૨॥

ત્વન્મન્દસ્મિતમઞ્જરીં પ્રસૃમરાં કામાક્ષિ ચન્દ્રાતપં
સન્તઃ સન્તતમામનન્ત્યમલતા તલ્લક્ષણં લક્ષ્યતે ।
અસ્માકં ન ધુનોતિ તાપકમધિકં ધૂનોતિ નાભ્યન્તરં
ધ્વાન્તં તત્ખલુ દુઃખિનો વયમિદં કેનોતિ નો વિદ્મહે ॥ ૬૩॥

નમ્રસ્ય પ્રણયપ્રરૂઢકલહચ્છેદાય પાદાબ્જયોઃ
મન્દં ચન્દ્રકિશોરશેખરમણેઃ કામાક્ષિ રાગેણ તે ।
બન્ધૂકપ્રસવશ્રિયં જિતવતો બંહીયસીં તાદૃશીં
બિમ્બોષ્ઠસ્ય રુચિં નિરસ્ય હસિતજ્યોત્સ્ના વયસ્યાયતે ॥ ૬૪॥

મુક્તાનાં પરિમોચનં વિદધતસ્તત્પ્રીતિનિષ્પાદિની
ભૂયો દૂરત એવ ધૂતમરુતસ્તત્પાલનં તન્વતી ।
ઉદ્ભૂતસ્ય જલાન્તરાદવિરતં તદ્દૂરતાં જગ્મુષી
કામાક્ષિ સ્મિતમઞ્જરી તવ કથં કમ્બોસ્તુલામશ્નુતે ॥ ૬૫॥

શ્રીકામાક્ષિ તવ સ્મિતદ્યુતિઝરીવૈદગ્ધ્યલીલાયિતં
પશ્યન્તોઽપિ નિરન્તરં સુવિમલંમન્યા જગન્મણ્ડલે ।

લોકં હાસયિતું કિમર્થમનિશં પ્રાકાશ્યમાતન્વતે
મન્દાક્ષં વિરહય્ય મઙ્ગલતરં મન્દારચન્દ્રાદયઃ ॥ ૬૬॥

ક્ષીરાબ્ધેરપિ શૈલરાજતનયે ત્વન્મન્દહાસસ્ય ચ
શ્રીકામાક્ષિ વલક્ષિમોદયનિધેઃ કિંચિદ્ભિદાં બ્રૂમહે ।
એકસ્મૈ પુરુષાય દેવિ સ દદૌ લક્ષ્મીં કદાચિત્પુરા
સર્વેભ્યોઽપિ દદાત્યસૌ તુ સતતં લક્ષ્મીં ચ વાગીશ્વરીમ્ ॥ ૬૭॥

શ્રીકાઞ્ચીપુરરત્નદીપકલિકે તાન્યેવ મેનાત્મજે
ચાકોરાણિ કુલાનિ દેવિ સુતરાં ધન્યાનિ મન્યામહે ।
કમ્પાતીરકુટુમ્બચંક્રમકલાચુઞ્ચૂનિ ચઞ્ચૂપુટૈઃ
નિત્યં યાનિ તવ સ્મિતેન્દુમહસામાસ્વાદમાતન્વતે ॥ ૬૮॥

શૈત્યપ્રક્રમમાશ્રિતોઽપિ નમતાં જાડ્યપ્રથાં ધૂનયન્
નૈર્મલ્યં પરમં ગતોઽપિ ગિરિશં રાગાકુલં ચારયન્ ।
લીલાલાપપુરસ્સરોઽપિ સતતં વાચંયમાન્પ્રીણયન્
કામાક્ષિ સ્મિતરોચિષાં તવ સમુલ્લાસઃ કથં વર્ણ્યતે ॥ ૬૯॥

શ્રોણીચઞ્ચલમેખલામુખરિતં લીલાગતં મન્થરં
ભ્રૂવલ્લીચલનં કટાક્ષવલનં મન્દાક્ષવીક્ષાચણમ્ ।
યદ્વૈદગ્ધ્યમુખેન મન્મથરિપું સંમોહયન્ત્યઞ્જસા
શ્રીકામાક્ષિ તવ સ્મિતાય સતતં તસ્મૈ નમ્સકુર્મહે ॥ ૭૦॥

શ્રીકામાક્ષિ મનોજ્ઞમન્દહસિતજ્યોતિષ્પ્રરોહે તવ
સ્ફીતશ્વેતિમસાર્વભૌમસરણિપ્રાગલ્ભ્યમભ્યેયુષિ ।
ચન્દ્રોઽયં યુવરાજતાં કલયતે ચેટીધુરં ચન્દ્રિકા
શુદ્ધા સા ચ સુધાઝરી સહચરીસાધર્મ્યમાલમ્બતે ॥ ૭૧॥

જ્યોત્સ્ના કિં તનુતે ફલં તનુમતામૌષ્ણ્યપ્રશાન્તિં વિના
ત્વન્મન્દસ્મિતરોચિષા તનુમતાં કામાક્ષિ રોચિષ્ણુના ।
સન્તાપો વિનિવાર્યતે નવવયઃપ્રાચુર્યમઙ્કૂર્યતે
સૌન્દર્યં પરિપૂર્યતે જગતિ સા કીર્તિશ્ચ સંચાર્યતે ॥ ૭૨॥

વૈમલ્યં કુમુદશ્રિયાં હિમરુચઃ કાન્ત્યૈવ સન્ધુક્ષ્યતે
જ્યોત્સ્નારોચિરપિ પ્રદોષસમયં પ્રાપ્યૈવ સમ્પદ્યતે ।
સ્વચ્છત્વં નવમૌક્તિકસ્ય પરમં સંસ્કારતો દૃશ્યતે
કામાક્ષ્યાઃ સ્મિતદીધિતેર્વિશદિમા નૈસર્ગિકો ભાસતે ॥ ૭૩॥

પ્રાકાશ્યં પરમેશ્વરપ્રણયિનિ ત્વન્મન્દહાસશ્રિયઃ
શ્રીકામાક્ષિ મમ ક્ષિણોતુ મમતાવૈચક્ષણીમક્ષયામ્ ।
યદ્ભીત્યેવ નિલીયતે હિમકરો મેઘોદરે શુક્તિકા-
ગર્ભે મૌક્તિકમણ્ડલી ચ સરસીમધ્યે મૃણાલી ચ સા ॥ ૭૪॥

હેરમ્બે ચ ગુહે હર્ષભરિતં વાત્સલ્યમઙ્કૂરયત્
મારદ્રોહિણિ પૂરુષે સહભુવં પ્રેમાઙ્કુરં વ્યઞ્જયત્ ।
આનમ્રેષુ જનેષુ પૂર્ણકરુણાવૈદગ્ધ્યમુત્તાલયત્
કામાક્ષિ સ્મિતમઞ્જસા તવ કથંકારં મયા કથ્યતે ॥ ૭૫॥

સંક્રુધ્દ્દ્વિજરાજકોઽપ્યવિરતં કુર્વન્દ્વિજૈઃ સંગમં
વાણીપદ્ધતિદૂરગોઽપિ સતતં તત્સાહચર્યં વહન્ ।
અશ્રાન્તં પશુદુર્લભોઽપિ કલયન્પત્યૌ પશૂનાં રતિં
શ્રીકામાક્ષિ તવ સ્મિતામૃતરસસ્યન્દો મયિ સ્પન્દતામ્ ॥ ૭૬॥

શ્રીકામાક્ષિ મહેશ્વરે નિરુપમપ્રેમાઙ્કુરપ્રક્રમં
નિત્યં યઃ પ્રકટીકરોતિ સહજામુન્નિદ્રયન્માધુરીમ્ ।
તત્તાદૃક્તવ મન્દહાસમહિમા માતઃ કથં માનિતાં
તન્મૂર્ધ્ના સુરનિમ્નગાં ચ કલિકામિન્દોશ્ચ તાં નિન્દતિ ॥ ૭૭॥

યે માધુર્યવિહારમણ્ટપભુવો યે શૈત્યમુદ્રાકરા
યે વૈશદ્યદશાવિશેષસુભગાસ્તે મન્દહાસાઙ્કુરાઃ ।
કામાક્ષ્યાઃ સહજં ગુણત્રયમિદં પર્યાયતઃ કુર્વતાં
વાણીગુમ્ફનડમ્બરે ચ હૃદયે કીર્તિપ્રરોહે ચ મે ॥ ૭૮॥

કામાક્ષ્યા મૃદુલસ્મિતાંશુનિકરા દક્ષાન્તકે વીક્ષણે
મન્દાક્ષગ્રહિલા હિમદ્યુતિમયૂખાક્ષેપદીક્ષાઙ્કુરાઃ ।
દાક્ષ્યં પક્ષ્મલયન્તુ માક્ષિકગુડદ્રાક્ષાભવં વાક્ષુ મે
સૂક્ષ્મં મોક્ષપથં નિરીક્ષિતુમપિ પ્રક્ષાલયેયુર્મનઃ ॥ ૭૯॥

જાત્યા શીતશીતલાનિ મધુરાણ્યેતાનિ પૂતાનિ તે
ગાઙ્ગાનીવ પયાંસિ દેવિ પટલાન્યલ્પસ્મિતજ્યોતિષામ્ ।
એનઃપઙ્કપરમ્પરામલિનિતામેકામ્રનાથપ્રિયે
પ્રજ્ઞાનાત્સુતરાં મદીયધિષણાં પ્રક્ષાલયન્તુ ક્ષણાત્ ॥ ૮૦॥

અશ્રાન્તં પરતન્ત્રિતઃ પશુપતિસ્ત્વન્મન્દહાસાઙ્કુરૈઃ

શ્રીકામાક્ષિ તદીયવર્ણસમતાસઙ્ગેન શઙ્કામહે ।
ઇન્દું નાકધુનીં ચ શેખરયતે માલાં ચ ધત્તે નવૈઃ
વૈકુણ્ઠૈરવકુણ્ઠનં ચ કુરુતે ધૂલીચયૈર્ભાસ્મનૈઃ ॥ ૮૧॥

શ્રીકાઞ્ચીપુરદેવતે મૃદુવચસ્સૌરભ્યમુદ્રાસ્પદં
પ્રૌઢપ્રેમલતાનવીનકુસુમં મન્દસ્મિતં તાવકમ્ ।
મન્દં કન્દલતિ પ્રિયસ્ય વદનાલોકે સમાભાષણે
શ્લક્ષ્ણે કુડ્મલતિ પ્રરૂઢપુલકે ચાશ્લોષણે ફુલ્લતિ ॥ ૮૨॥

કિં ત્રૈસ્રોતસમમ્બિકે પરિણતં સ્રોતશ્ચતુર્થં નવં
પીયૂષસ્ય સમસ્તતાપહરણં કિંવા દ્વિતીયં વપુઃ ।
કિંસ્વિત્ત્વન્નિકટં ગતં મધુરિમાભ્યાસાય ગવ્યં પયઃ
શ્રીકાઞ્ચીપુરનાયકપ્રિયતમે મન્દસ્મિતં તાવકમ્ ॥ ૮૩॥

ભૂષા વક્ત્રસરોરુહસ્ય સહજા વાચાં સખી શાશ્વતી
નીવી વિભ્રમસન્તતેઃ પશુપતેઃ સૌધી દૃશાં પારણા ।
જીવાતુર્મદનશ્રિયઃ શશિરુચેરુચ્ચાટની દેવતા
શ્રીકામાક્ષિ ગિરામભૂમિમયતે હાસપ્રભામઞ્જરી ॥ ૮૪॥

સૂતિઃ શ્વેતિમકન્દલસ્ય વસતિઃ શૃઙ્ગારસારશ્રિયઃ
પૂર્તિઃ સૂક્તિઝરીરસસ્ય લહરી કારુણ્યપાથોનિધેઃ ।
વાટી કાચન કૌસુમી મધુરિમસ્વારાજ્યલક્ષ્મ્યાસ્તવ
શ્રીકામાક્ષિ મમાસ્તુ મઙ્ગલકરી હાસપ્રભાચાતુરી ॥ ૮૫॥

જન્તૂનાં જનિદુઃખમૃત્યુલહરીસન્તાપનં કૃન્તતઃ
પ્રૌઢાનુગ્રહપૂર્ણશીતલરુચો નિત્યોદયં બિભ્રતઃ ।
શ્રીકામાક્ષિ વિસૃત્વરા ઇવ કરા હાસાઙ્કુરાસ્તે હઠા-
દાલોકેન નિહન્યુરન્ધતમસસ્તોમસ્ય મે સન્તતિમ્ ॥ ૮૬॥

ઉત્તુઙ્ગસ્તનમણ્ડલસ્ય વિલસલ્લાવણ્યલીલાનટી-
રઙ્ગસ્ય સ્ફુટમૂર્ધ્વસીમનિ મુહુઃ પ્રાકાશ્યમભ્યેયુષી ।
શ્રીકામાક્ષિ તવ સ્મિતદ્યુતિતતિર્બિમ્બોષ્ઠકાન્ત્યઙ્કુરૈઃ
ચિત્રાં વિદ્રુમમુદ્રિતાં વિતનુતે મૌક્તીં વિતાનશ્રિયમ્ ॥ ૮૭॥

સ્વાભાવ્યાત્તવ વક્ત્રમેવ લલિતં સન્તોષસમ્પાદનં
શમ્ભોઃ કિં પુનરઞ્ચિતસ્મિતરુચઃ પાણ્ડિત્યપાત્રીકૃતમ્ ।
અમ્ભોજં સ્વત એવ સર્વજગતાં ચક્ષુઃપ્રિયમ્ભાવુકં

કામાક્ષિ સ્ફુરિતે શરદ્વિકસિતે કીદૃગ્વિધં ભ્રાજતે ॥ ૮૮॥

પુમ્ભિર્નિર્મલમાનસૌર્વિદધતે મૈત્રીં દૃઢં નિર્મલાં
લબ્ધ્વા કર્મલયં ચ નિર્મલતરાં કીર્તિં લભન્તેતરામ્ ।
સૂક્તિં પક્ષ્મલયન્તિ નિર્મલતમાં યત્તાવકાઃ સેવકાઃ
તત્કામાક્ષિ તવ સ્મિતસ્ય કલયા નૈર્મલ્યસીમાનિધેઃ ॥ ૮૯॥

આકર્ષન્નયનાનિ નાકિસદસાં શૈત્યેન સંસ્તમ્ભય-
ન્નિન્દું કિંચ વિમોહયન્પશુપતિં વિશ્વાર્તિમુચ્ચાટયન્ ।
હિંસત્સંસૃતિડમ્બરં તવ શિવે હાસાહ્વયો માન્ત્રિકઃ
શ્રીકામાક્ષિ મદીયમાનસતમોવિદ્વેષણે ચેષ્ટતામ્ ॥ ૯૦॥

ક્ષેપીયઃ ક્ષપયન્તુ કલ્મષભયાન્યસ્માકમલ્પસ્મિત-
જ્યોતિર્મણ્ડલચંક્રમાસ્તવ શિવે કામાક્ષિ રોચિષ્ણવઃ ।
પીડાકર્મઠકર્મઘર્મસમયવ્યાપારતાપાનલ-
શ્રીપાતા નવહર્ષવર્ષણસુધાસ્રોતસ્વિનીશીકરાઃ ॥ ૯૧॥

શ્રીકામાક્ષિ તવ સ્મિતૈન્દવમહઃપૂરે પરિસ્ફૂર્જતિ
પ્રૌઢાં વારિધિચાતુરીં કલયતે ભક્તાત્મનાં પ્રાતિભમ્ ।
દૌર્ગત્યપ્રસરાસ્તમઃપટલિકાસાધર્મ્યમાબિભ્રતે
સર્વં કૈરવસાહચર્યપદવીરીતિં વિધત્તે પરમ્ ॥ ૯૨॥

મન્દારાદિષુ મન્મથારિમહિષિ પ્રાકાશ્યરીતિં નિજાં
કાદાચિત્કતયા વિશઙ્ક્ય બહુશો વૈશદ્યમુદ્રાગુણઃ ।
સાતત્યેન તવ સ્મિતે વિતનુતે સ્વૈરાસનાવાસનામ્ ॥ ૯૩॥

ઇન્ધાને ભવવીતિહોત્રનિવહે કર્મૌઘચણ્ડાનિલ-
પ્રૌઢિમ્ના બહુલીકૃતે નિપતિતં સન્તાપચિન્તાકુલમ્ ।
માતર્માં પરિષિઞ્ચ કિંચિદમલૈઃ પીયૂષવર્ષૈરિવ
શ્રીકામાક્ષિ તવ સ્મિતદ્યુતિકણૈઃ શૈશિર્યલીલાકરૈઃ ॥ ૯૪॥

ભાષાયા રસનાગ્રખેલનજુષઃ શૃઙ્ગારમુદ્રાસખી-
લીલાજાતરતેઃ સુખેન નિયમસ્નાનાય મેનાત્મજે ।
શ્રીકામાક્ષિ સુધામયીવ શિશિરા સ્રોતસ્વિની તાવકી
ગાઢાનન્દતરઙ્ગિતા વિજયતે હાસપ્રભાચાતુરી ॥ ૯૫॥

સન્તાપં વિરલીકરોતુ સકલં કામાક્ષિ મચ્ચેતના

મજ્જન્તી મધુરસ્મિતામરધુનીકલ્લોલજાલેષુ તે ।
નૈરન્તર્યમુપેત્ય મન્મથમરુલ્લોલેષુ યેષુ સ્ફુટં
પ્રેમેન્દુઃ પ્રતિબિમ્બિતો વિતનુતે કૌતૂહલં ધૂર્જટેઃ ॥ ૯૬॥

ચેતઃક્ષીરપયોધિમન્થરચલદ્રાગાખ્યમન્થાચલ-
ક્ષોભવ્યાપૃતિસમ્ભવાં જનનિ તે મન્દસ્મિતશ્રીસુધામ્ ।
સ્વાદંસ્વાદમુદીતકૌતુકરસા નેત્રત્રયી શાંકરી
શ્રીકામાક્ષિ નિરન્તરં પરિણમત્યાનન્દવીચીમયી ॥ ૯૭॥

આલોકે તવ પઞ્ચસાયકરિપોરુદ્દામકૌતૂહલ-
પ્રેઙ્ખન્મારુતઘટ્ટનપ્રચલિતાદાનન્દદુગ્ધામ્બુધેઃ ।
કાચિદ્વીચિરુદઞ્ચતિ પ્રતિનવા સંવિત્પ્રરોહાત્મિકા
તાં કામાક્ષિ કવીશ્વરાઃ સ્મિતમિતિ વ્યાકુર્વતે સર્વદા ॥ ૯૮॥

સૂક્તિઃ શીલયતે કિમદ્રિતનયે મન્દસ્મિતાત્તે મુહુઃ
માધુર્યાગમસમ્પ્રદાયમથવા સૂક્તેર્નુ મન્દસ્મિતમ્ ।
ઇત્થં કામપિ ગાહતે મમ મનઃ સન્દેહમાર્ગભ્રમિં
શ્રીકામાક્ષિ ન પારમાર્થ્યસરણિસ્ફૂર્તૌ નિધત્તે પદમ્ ॥ ૯૯॥

ક્રીડાલોલકૃપાસરોરુહમુખીસૌધાઙ્ગણેભ્યઃ કવિ-
શ્રેણીવાક્પરિપાટિકામૃતઝરીસૂતીગૃહેભ્યઃ શિવે ।
નિર્વાણાઙ્કુરસાર્વભૌમપદવીસિંહાસનેભ્યસ્તવ
શ્રીકામાક્ષિ મનોજ્ઞમન્દહસિતજ્યોતિષ્કણેભ્યો નમઃ ॥ ૧૦૦॥

આર્યામેવ વિભાવયન્મનસિ યઃ પાદારવિન્દં પુરઃ
પશ્યન્નારભતે સ્તુતિં સ નિયતં લબ્ધ્વા કટાક્ષચ્છવિમ્ ।
કામાક્ષ્યા મૃદુલસ્મિતાંશુલહરીજ્યોત્સ્નાવયસ્યાન્વિતામ્
આરોહત્યપવર્ગસૌધવલભીમાનન્દવીચીમયીમ્ ॥ ૧૦૧॥

મન્દસ્મિતશતકં સમ્પૂર્ણમ્ ॥

શ્રી મૂકપઞ્ચશતી સમ્પૂર્ણા ॥

॥ ૐ તત્ સત્ ॥

Encoded and proofread by Sridhar Seshagiri sridhar.seshagiri at gmail.com

*shrImUkapa nchashatI*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*